विषयानुक्रमः

परोपकारः

(परोपकाराय सतां विभूतयः)

'परेषाम् उपकारः' परोपकारः। संसारे परोपकारस्य महान् महिमा। ब्रह्मा संसारस्य विनिर्माणे नग-नदी-वृक्षादीन् रचयित्वा तेषां माध्यमेन नक्तन्दिवं परोपकारकरणं स्मारयति। नगेषु ये खनिजादिपदार्थाः सन्ति तैः परेषाम् उपकारो भवति। नदी रात्रिन्दिवं प्रवहन्ती स्वजलेन परोपकारं विदधाति। वृक्षाः स्वकीयैः फलैः काष्ठैः छायादिभिः महान्तम् उपकारं कुर्वन्ति सृष्टेः। जलदा अपि वर्षणेन बहूपकुर्वन्ति जीवलोकस्य। अत उक्तम्--

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति शस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः॥

परोपकारस्य मानवजीवने परमं महत्त्वमस्ति। महाराजः शिविः कपोतस्य रक्षायै परोपकारभावनया श्येनरूपधराय देवराजाय स्वकीयस्य शरीरस्य मांसं दत्तवान्। महर्षिः दधीचिरपि देवद्रोहिणो वृत्रासुरस्य वधाय देवराजेन याचितः सन् अस्थिप्रदानाय स्वशरीरं तत्याज। याचितः एवमेव नागानन्दनाटकस्य नायको जीमूतवाहनः गरुडाद् भीतान् नागान् त्रातुं परोपकारभावनया प्रेरितः गरुडाय निजं शरीरं प्रायच्छत्। अथ च गरुडोऽपि जीमूतवाहनस्य तथाविधेन परोपकारेण प्रभावितः नागानां वधं त्यक्तवान्। मानवजीवनस्य परोपकारः खलु अलंकारः। परोपकारं विना मानवजीवनं न शोभते। तद्यथा--

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न च कङ्कणेन।

विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन ॥

कविकुलगुरुः कालिदासोऽपि स्वकीये नाटकेऽभिज्ञानशाकुन्तले परोपकारं महापुरुषाणां स्वभावं समर्थयन्नुक्तवान्--

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वाभव एवैष परोपकारिणाम् ॥

व्यासविरचितेषु अष्टादशपुराणेषु सर्वासां कथानामयमेव सारो यत् परोपकारसम्पादनेन पुण्यं भवति । अथ च परेषां पीडनेन पापं संजायते-

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

परोपकारमाश्रित्य जनानां तिस्रः श्रेणयः प्रतिपादिताः । ते परोपकारिणः प्रथमश्रेण्यां वर्तन्ते, ये स्वार्थम् परित्यज्यापि परोपकारं साधयन्ति । अथ च ये स्वार्थम् अलोपयन्तः परोपकारं कुर्वन्ति, ते परोपकारिणः द्वितीयश्रेण्यां वर्तन्ते । ये च स्वार्थसाधनाय परार्थं निघ्नन्ति ते जनाः राक्षससन्निभाः सन्ति । ये च निरर्थकं परार्थं विलोपयन्ति ते खलु राक्षसेभ्योऽप्यधमाः वर्तन्ते यथाह आचार्यः भर्तृहरिः--

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामन्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

अन्याः अपि प्रचुराः सूक्तयः सन्तिः, यासु परोपकारमहिमा प्रतिपादितः । सहस्राधिकानि च कथानकानि सन्ति येषु परोपकारः एव प्रतिपाद्यविषयः । वस्तुतः जगदिदं परोपकार-भावनयैव स्वर्गोपमं भवितुं शक्नोति । अतः परोपकारः सततं साधनीयः एव ।

सत्सङ्गतिः

सतां सङ्गतिः सत्सङ्गतिः। मानवः सामाजिकः प्राणी विद्यते। स बहुकालपर्यन्तम् एकाकी स्थातुं न पारयति। ऋषयोऽपि ध्यानस्य समाधेश्च विरामे सङ्गतिं कुर्वन्ति स्म। सङ्गतिः द्विविधा भवति। सज्जनैः सह यदा सङ्गतिः क्रियते तदा 'सत्सङ्गतिः' संजायते। यदा दुष्टैः सह सङ्गतिर्विधीयते तदा सा 'कुसङ्गतिः' इति कथ्यते। कुसङ्गतिः सर्वथा त्याज्या, यतो हि कुसङ्गतिप्रभावेण जनस्य कल्याणं न भवति। सत्सङ्गतिः प्रयासपूर्वकं करणीया, यतो हि सत्सङ्गतिः सर्वथा जनानां कल्याणं सम्पादयति।

सत्सङ्गतेः प्रभावेण न केवलं मानवः उच्चतां प्राप्नोति, अपि तु वृक्षादयो जडपदार्थाः अपि सत्सङ्गति-प्रभावेन प्रभाविताः दृश्यन्ते। मलयपर्वते चन्दनवृक्षाणां प्रभावेण चन्दनेतराः तरवोऽपि चन्दनसुगन्धं दधति। कटुधूमसङ्गेन गृहं मलिनदुर्गन्धपूर्णं च भवति, तदेव हवनादि-सुगन्धेन सुरभितं जायते।

पशुष्वपि सत्सङ्गतेः सुप्रभावो दृश्यते। सिंहव्याघ्रादयो हिंसकाः प्राणिनः शमप्रधानेषु मुनिजनाश्रमेषु शान्तस्वभावाः भवन्ति। स्वभाव-चञ्चलाः कपयो जाबालेराश्रमे नेत्रविहीनानां साधूनां सहायतामकुर्वन्।

पक्षिष्वपि सत्सङ्गतेः कुसङ्गतेश्च प्रभावो दृश्यते। अस्मिन् विषये एका लघ्वी कथा प्रचलितास्ति। कौचन शुकशावकौ केनचित् शाकुनिकेन गृहीत्वा हट्टं नीतौ। तस्मात् शाकुनिकाद् एकं शुकशावकं कश्चन मुनिः क्रीतवान्। अपरं शुकशावकं कश्चन मांसविक्रेता क्रीतवान्। कालान्तरेण तौ द्वावपि शुकशावकौ लब्धशिक्षौ बभूवतुः। मुनिशुकः मुनेः सम्पर्कात् सुभाषितानि रराट। मांसविक्रेतुः शुकः 'कर्तय मर्दय' इत्यादीनि अशुभानि पदानि अरटत्। अथैकदा द्वावपि शुकौ केनचिच्चौरेण चोरयित्वा एकस्मिन्नेव पञ्जरे कृत्वा हट्टं नीतौ। अधिकमूल्यवशाद् न

कोऽपि तौ शुकौ क्रीतवान्। अन्ततः कश्चिद् राजकर्मचारी मुनिशुकात् सुभाषितानि श्रुत्वा तौ क्रीत्वा स्व नृपाय निवेदितवान्। अथ राजा शुकौ पृष्ट्वा तावेव सम्बुध्य कथितवान्—'शुकौ किमपि वदतम्'। राजवचनं श्रुत्वा मुनिशुकः सुन्दराणि सुभाषितानि श्रावयामास। अथ मांसविक्रेतुः शुकः 'कर्तय मर्दय' इत्यादिरूक्षाणि वचांसि उच्चारयामास। राजा तं कुत्सितभाषिणं शुकं हन्तुमादिष्टवान्। तदा मुनिशुकः तं निषिध्य एवम् अवदत्—

अहं मुनीनां वचनं शृणोमि शृणोत्ययं यद् यवनस्य वाक्यम्।
न चास्य दोषो न च मे गुणो वा संसर्गजा दोषगुणा भवन्ति॥

यदा वृक्षादिषु जडपदार्थेषु पशुपक्षिषु च सङ्गतेः एतादृशः प्रभावो भवति तदा मनुष्यस्य तु कथैव का? मनुष्योऽधिकः संवेदनशीलो भवति, अतः तस्योपरि सङ्गतेरधिकः प्रभावः भवति। इत्थं विचार्यैवोक्तम्—

"सद्भिरेव सहासीत सद्भिः कुर्याच्च सङ्गतिम्।"

अयं सत्सङ्गतेः खलु महिमा यद् लुण्टाको वाल्मीकिः मुनिरभवत्। कालान्तरेण तपस्तप्त्वा सिद्धसरस्वतीकः आदिकाव्यं रामायणं प्रणिनाय। ये ये सिद्धाः महात्मानोऽभवन्, ये ये धर्मधुरन्धराः महावीराश्च अभूवन् ते सर्वे सत्सङ्गतिप्रभावेणैव तथा सञ्जाताः। सत्सङ्गतिमहिमा कल्पवृक्षं, कामधेनुं चिन्तामणिं च अतिक्रामति—

कल्पद्रुमः कल्पितमेव सूते
सा कामधुक् कामितमेव दोग्धि।
चिन्तामणिश्चिन्तितमेव दत्ते
सतां तु सङ्गः सकलं प्रसूते॥

श्रीमद्भागवते भगवान् श्रीकृष्णो देवर्षिनारद-समागमे सतां महिमानं वर्णयन्नेवमुक्तवान्—जलमयानि तीर्थानि, मृत्तिकानिर्मिताः पाषाणघटिताः वा देवाः बहुकालानन्तरं जनं कृतार्थीकुर्वन्ति, परन्तु सज्जनास्तु तत्काल एव फलप्रदाः—

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः॥

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः।
आचाराद् धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥

सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥

संक्षेपतः सर्वे वेदाः, सर्वाणि धर्मशास्त्राणि, पुराणानि, काव्यानि, नाटकानि, सर्वेऽप्यन्ये ग्रन्थाः एतदेवोपदिशन्ति यद् 'रामादिवत्प्रवर्तितव्यं न रावणादिवत् ।'

रामादयः सदाचारबलेनैव सर्वस्य श्रद्धास्पदत्वं प्रापुः। रावणादयो दुराचारकारणेनैव सर्वस्योद्वेगकारकाः सर्वस्य निन्दास्पदत्वम् उपजग्मुः। अतः सर्वैर्जनैः 'आचारः परमो धर्मः' इति हृदि निधाय जगतः कर्मसु प्रवर्तितव्यम् ।

—:o:—

वेदोऽखिलो धर्ममूलम्

वेद्यन्ते ज्ञायन्ते वा धर्मादिपुरुषार्थाः एभिरिति वेदाः। महर्षिणा दयानन्देन स्वकीयायां ऋग्वेदभाष्यभूमिकायाम्—विदन्ति, जानन्ति, विद्यन्ते, भवन्ति, सर्वा विद्या यैर्येषु वा स वेदः इति प्रकारान्तरेण प्रमाणितम्। ज्ञानार्थकविद् धातो घञ् (अथवा अच्) प्रत्यययोगात् वेदपदं निष्पन्नं भवति यस्यार्थः 'ज्ञानम्' अस्ति। वेदा हि नानाविधज्ञानाधिष्ठानानि सन्ति। वेदा विश्वसाहित्यस्य आदिमाः ग्रन्थाः। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति चत्वारो वेदाः। चतुर्षु वेदेषु ऋग्वेदः प्राचीनतमः।

'वेदोऽखिलो धर्ममूलम्' इति मनुस्मृतिप्रणेतुर्मनोर्वचनम्। धर्मस्य सत्यज्ञानस्य वा शाखानां मूलानि वेदेषु विद्यमानानि विद्यन्ते। वेदा अपौरुषेयाः सन्ति। यथा संस्कृतभाषायां विविधानि काव्यानि

रूपकाणि वा महाकविभिर्ग्रथितानि तथा वेदानां रचना नैव जाता। वेदास्तु तपोलग्नैः ऋषिभिः समाधिषु साक्षात्कृताः। अतः 'ऋषयो मन्त्रद्रष्टारः' इति मन्त्राणां साक्षात्कर्तारः ऋषय इति परिभाषितम्। वेदाः प्रलयेऽपि विलयं न गच्छन्ति। वेदा अनादिनिधनाः विष्णुबुद्धिगामिनः सर्गे सर्गे स्वयम्भुवा उपदिष्टा भवन्ति। यथोक्तम्—

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः॥
सर्गे सर्गेऽमुनैवैत उद्गीयन्ते तथैव च।

वेदाः सत्यविद्यानाम् आकराः। अतो यत्र प्रत्यक्षम् अनुमानं वा प्रमाणं नोपलभ्यते तत्र वेदानां साक्ष्यं स्वीकृतम्। तदुक्तम् आचार्येण सायणेन कृष्णयजुर्वेदीयभाष्यभूमिकायाम्—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥

महर्षिः पतञ्जलिर्महाभाष्ये व्याकरणस्य वेदाङ्गत्वं निरूपयन् वेदाध्ययनविषयकं स्वमतमाविष्करोति—

"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।"

शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दःशास्त्रम्, ज्योतिषञ्चेति वेदानां षडङ्गमुच्यते। तद्यथा—

शिक्षा व्याकरणं कल्पो निरुक्तं छन्दसां चितिः।
ज्यौतिषं चेति विज्ञेयं षडङ्गं बुधसत्तमैः॥

आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं चेत्युपवेदा निगदिताः। पुराणानि, न्यायशास्त्रं, मीमांसाशास्त्रं, धर्मशास्त्रं चेत्युपाङ्गानि प्रख्यातानि। वेदानामर्थोपगमाय वेदाङ्गानां पुराणादीनाञ्च ज्ञानमावश्यकं वर्तते। तद्यथा—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥

वेदे सर्वशक्तिमतः परमात्मनोऽजरामरस्वरूपस्य प्रतिपादनं प्रमुखविषयत्वेन वर्तते।

"एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।"

इति ऋगनुसारम् इन्द्र-वरुण-यम-सूर्योषः-पवमानपर्जन्य-प्रजापति-प्रभृतीनां देवतानां भगवतः प्रमुखाणां शक्तीनां, स्वरूपाणि स्तुतानि। सृष्टिक्रमः, सृष्टेर्यज्ञरूपता, यम-यमी संवादादिषु संवादयोजना, उषः सूक्तादिषु प्राकृतिकसुषमानिरूपणादयो विषयाः उपमा-रूपकाद्यलङ्कारैः समं विराजन्ते ये काव्यानां नाटकादीनामादिस्रोतोरूपेण संतिष्ठन्ते। राष्ट्रसमृद्ध्यर्थमपि बहवो मन्त्रा वेदेषूपलभ्यन्ते।

मानवानां कल्याणाय "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।" इत्यादयः उपदेशा अपि वेदेषु विलसन्ति। अक्षसूक्ते द्यूतक्रीडा-व्यसननिमग्नानां कृते हितोपदेशो द्रष्टव्यः—"अक्षैर्मा दीव्यः कृषिमित् कृषस्व" अर्थात् द्यूतेन धनप्राप्तिकामनां विहाय समृद्धये कृषिः करणीया। द्यूतशीलिनो द्यूताद् वारणाय द्यूतप्रभवां दुर्दशां निरूपयति—

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित्।
ऋणा वा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुपनक्तमेति॥

समाजे सामञ्जस्य निरूपणाय ऋचेयं दर्शनीया—

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे संजानाना उपासते॥

गुरुशिष्ययोः सम्बन्धस्य दृढतायै ऋगियं कियती महत्त्वपूर्णा—

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु मा विद्विषावहै॥

वेदेषु कर्तव्यनिर्देशनपराः काश्चित् सूक्तयोऽवलोकनीयाः—

नानाश्रान्ताय श्रीरस्ति।
न ऋते श्रान्तस्य सख्याय देवाः।
न स सखा यो न ददाति सख्ये।
माता भूमिः पुत्रोऽहं पृथिव्याः।
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।

ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत ।
न वित्तेन तर्पणीयो मनुष्यः ।
कृण्वन्तो विश्वमार्यम् ।

इत्थं हि संक्षेपेण वेदानां धर्ममूलत्वं निरूपितम् । विस्तरेण वेदानां परिचयाय लघुकलेवरेऽस्मिन् निबन्धे क्वावकाशः ? सत्यविद्यामूलत्वाद् वेदाः सर्वैरध्येयाः ।

—:o:—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन

महाभारतयुद्धे यदा कौरव-पाण्डवानां सेने सम्मुखीने आस्ताम्, तदोभयोः सेनयोर्मध्ये स्वसम्बन्धिनो वीक्ष्य अर्जुनो दयाप्लुतः सन् युद्ध-निश्चयं शिथिलीकृत्य रथोपस्थे स्थितवान् । तथाविधं विषीदन्तमर्जुनं कर्ममार्गं प्रति प्रेरयन् भगवान् श्रीकृष्णो ब्रवीति स्म—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥

जनकादयो ब्रह्मज्ञानिनोऽपि कर्ममार्गं न त्यक्तवन्तः, अपि तु ते कर्ममार्गाश्रयेणैव सिद्धि प्राप्तवन्तः । लोकसंग्रहदृष्ट्यापि कर्मपरिहारो न श्रेयस्करः । लोकयात्रापि कर्म विना न सिद्ध्यति । यथा—

कर्मण व हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ॥

कीदृशं कर्म कतुं योग्यं भवति कीदृशं च परिवर्जनीयमिति विचार्यैव कर्मक रणीयम् । कर्मणः स्वरूपमनभिज्ञाय कर्मकरणेन महान् दोषो भवितुमर्हति । संसारे कर्मणां मध्ये वहून्येतादृशानि कर्माणि सन्ति येषां सम्पादनं न श्रेयस्करम् । अतः 'कार्यं कर्म समाचार' इति वचनानुसारं करणीयस्य कर्मणः सम्पादनं करणीयम् । अथ किं कर्म करणीयम् भवतीति जिज्ञासायां गीतायाः निम्नलिखितः श्लोको ध्यातव्यः—

तस्माच्छास्त्रं प्रमाणं च कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानेन कर्म कर्तुमिहार्हसि ॥

शास्त्रेषु यत्कर्म प्रशस्तमभिहितं तदेव करणीयम् । किं करणीयं किम् अकरणीयम् इति विषये विद्वांसोऽपि मोहमापन्नाः सन्ति । अत एव पूर्वैः पूर्वतरैः कृतानि कर्माणि शास्त्रं पुरस्कृत्य कर्तव्यानि । यथोक्तम्--

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरैः कृतम् ॥

परन्तु यत् कर्म सहजं वर्तते तस्य सदोषस्यापि कर्मणः परिवर्जनं नोचितम् । यतो हि यथाग्नौ धूमवत्त्वं भवत्येव तथैव कर्मस्वपि दोष-राहित्यं नास्ति । अतः कुलपरम्परानुप्राप्ते कर्मणि दोषो नास्ति—

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥

निष्कामदृष्ट्या कर्मकरणं श्रेष्ठतमम् । आसक्तिं विहाय, कर्मणां फलं परमात्मने समर्प्य, कर्मकरणेन जनः तथैव कर्मफलेन लिप्तो न भवति यथा जलजं जले स्थितमपि जलेन न लिप्यते । यथा--

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

परमात्मना यथा सर्वं जगदिदं सृष्टं तथा कर्माण्यापि तेनैव सृष्टानि । 'कर्म ब्रह्मोद्भवं विद्धि' इति गीतावचनमत्र प्रमाणम् । अतो यस्य यत् कर्म वर्तते तेन तत् कर्म करणीयम् । स्वस्मिन् स्वस्मिन् कर्मणि निरतो मनुष्यः सफलतां लभते । यथोच्यते--

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।

कर्मफलत्यागपूर्वकं ये जनाः कर्माणि सम्पादयन्ति, ते परमात्मनोऽर्चनं कुर्वन्ति । इदं कर्मार्चनं नाम । कर्मार्चनेन मानवः सिद्धिं प्राप्नोति-

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।

वेदाज्ञानुसारं केनापि जनेन कर्माणि कुर्वता एव शतवर्षपर्यन्तं जीवितुम् अभिलाषः करणीयः । यश्च जनः कर्मानुष्ठानं न चिकीर्षति स लोकेऽस्मिन् जीवितुम् मा इच्छेत् । यथा--

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।

कर्मलग्नः सर्वत्र समाद्रियते । कर्मशीलः स्वस्य, स्वपरिवारस्य, स्वसमाजस्य, राष्ट्रस्य, विश्वस्य च समुन्नयनं कर्तुं पारयति । कर्मशीलः कर्मशालितया महान्ति पदान्यधितिष्ठति उच्चोच्चैः पुरस्कारैश्च पुरस्क्रियते ।

जापानादयो लघवोऽपि देशाः कर्मशीलत्वाद् महत्त्वपूर्णाः सन्ति जगति । कर्मशीलतयैव अमेरिका सोवियतसंघौ विश्वे शीर्षस्थौ स्तः, शत्रुतया मित्रतया वा सर्वान् देशान् प्रभावयतः । ततः सर्वासामुन्नतीनां मूले कर्मैव विद्यते ।

सांसारिककर्मापि अनासक्तभावनया ईश्वरार्पणभावनया च यदि सम्पाद्यते तदा मानवस्यैहलौकिकं पारलौकिकं च कल्याणं भवति । अयमेव 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इति गीतावचनस्याभिप्रायः ।

—: ० :—

आचार्यदेवो भव

(आचार्य-गौरवम्, गुरुमहिमा)

'आचार्यदेवो भव' इति वेदवचनम् । आचार्यं देवबुद्ध्या सम्मानय न तु मनुष्यबुद्ध्येत्यस्याभिप्रायः । माता जन्मदातृत्वात् पालनात् पोषणाच्च पूजनीया । पिता हितचिन्तनात् सुतार्थं व्ययकर्तृत्वाच्च पूजनीयः । परम् आचार्यो ज्ञान-जन्मदातृत्वात् पूजनीयतमः । आचार्यो ज्ञानजलेन शिष्याज्ञानमलं प्रक्षाल्य तं संस्कारसम्पन्नं विदधाति । पुरा आश्रमव्यवस्थायाम् आचार्यः शिष्यमुपनीय वेदमध्यापयति स्म । आचार्येण उपनीतम् अध्येतारं शिष्यं द्रष्टुं देवाः आयान्ति स्म । यथोक्तम् अथर्ववेदे—

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातमभियान्ति देवाः॥

आचार्यस्य कोऽभिप्राय इति जिज्ञासायाम् **"आचार्यः कस्मात्? आचार्य आचारं ग्राहयति"** इति निरुक्ते यास्कस्य निर्वचनम्। मनुस्मृतिकारो मनुराचार्यं ब्रह्मस्वरूपं मनुते—

"आचार्यो ब्रह्मणो मूर्तिः" इति।

भारतीयसंस्कृतौ आचार्यस्योत्कृष्टं स्थानमस्ति। सर्वविद्याव्रतस्नात आचार्यः स्वाश्रमगतान् शिष्यान् अध्यापयति स्म। अथ ये गृहं गृहं गत्वा अध्यापयामासुस्ते उपाध्यायाः प्रकीर्तिताः। आचार्य एव गुरुशब्देन व्यपदिश्यते। पराविद्याया अपराविद्याया वा गुरुः सर्वथा वन्दनीयः—

एकमप्यक्षर यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद् दत्त्वानृणो भवेत्॥

अज्ञानान्धकारे निमग्नस्य शिष्यस्य ज्ञानप्रकाशेन यो नेत्रे समुन्मीलयति स गुरुः प्रणम्यः समर्चनीयश्च। अत उक्तम्—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

जगति यः प्रज्ञाप्रभवो विकासो दृश्यते स गुरूणां कृपयैव सम्पन्नः। आध्यात्मिकज्ञानप्राप्तये यथा गुरोरावश्यकता भवति तथैव भौतिकज्ञानोपलब्धयेऽपि गुरोरावश्यकता जागर्ति। यथा प्राचोनकाले वशिष्ठ-याज्ञवल्क्यादीनां ऋषिपरम्परायाम् आध्यात्मिकविद्यायाः प्रकाशः संसारेणोपलब्धः, यथा कण्व-वरतन्तु-सान्दीपनि-प्रभृतीनाम् आचार्याणामाश्रमेषु छात्राः बहुविधा विद्याः समधीत्य जगति विद्यायाः प्रकाशमकुर्वन्, यथा परशुराम-द्रोणाचार्यादिभ्यः आचार्यप्रवरभ्यो धनुर्विद्यामवाप्य भीष्म-कर्ण-भीमार्जुनादयः त्रिभुवनविख्याता अभूवन् तथैवेदानीमपि प्रकारान्तरेण शिक्षाक्रमोऽयं विद्यालयेषु च संचरन्नास्ते। अधुनाप्याचार्याणां गुरुजनानां नव-नवानुसन्धानानां लाभो विद्यार्थिभिः प्राप्यते। गुरुभ्यो विद्याः समधीत्याद्यापि विद्यार्थिनो महत्सु पदेषु नियुक्ताः स्वजीवनं सफलं कुर्वन्ति।

ज्ञान-विज्ञानानां का सा शाखा या गुरुजनान् विनैव पल्लविता भवेत् ? अतो मनीषिभिः गुरोस्तुलना न केवलं ब्रह्मणा विष्णुना, महेशेनैव वा कृता, अपि तु तस्य महत्त्वं परब्रह्मसन्निभं स्वीकृतम् । यथा--

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥

अधुनापि ज्ञानगरिम्णा मण्डितानां गुरूणां, सुस्निग्धानां विनयशीलानां शिष्याणां चाभावो नास्ति । राग-द्वेषपराङ्मुखः शुकदेवोऽपि सम्यगुपदेशाय शिष्ये विनम्रताया आवश्यकतां स्वीकरोति श्रीमद्भागवते—

ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ।

अध्यापनवेलायां मन्दबुद्धीनां छात्राणां गुरुजनैः कृतः तिरस्कारोऽपि छात्राणां क्षेमाय कल्पते । पण्डितराजस्य जगन्नाथस्य एतद्भावप्रकाशकं पद्यमवलोक्यताम्--

गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति ॥

लोकभाषास्वपि गुरुजनमहत्त्वपरकाणि प्रचुराणि पद्यानि विराजन्ते । समावर्तनसंस्कारसमये सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । इत्याद्युपदिशन्नाचार्यः "यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नेतराणि" इत्युपदिशति । आचार्यपरम्परां विहाय ईदृशी स्पष्टवादिता क्व प्राप्स्यते ? धन्येयं आचार्य-सरणिः, यस्या दिव्यत्वं वेदेऽपि स्वीकृतम्--'आचार्यदेवो भव' इति ।

--:o:--

सन्तोषः परमं सुखम्

(सन्तोष एव पुरुषस्य परं निधानम्)

योगदर्शने महर्षिणा पतञ्जलिना सन्तोषस्य नियमेषु पाठः कृतः। यथा—'शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः'। योग-सूत्रभाष्ये च श्रीव्यासः 'सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा' इति सन्तोषलक्षणं कृतवान्। समुपलब्धेषु स्वेषु साधनेषु संतुष्टिः, तदतिरिक्तेषु परस्य वस्तुषु अभिलाषाभाव एव सन्तोषः।

सर्वो जनः सुखार्थमेव तेषु तेषु कर्मसु व्यापृतो भवति। नवनवानां वस्तूनां प्राप्तौ सुखमनुभवति। परन्तु यदवधि जनस्य मानसे नव नवेषु वस्तुषु अभिलाषो जागर्ति तदवधि स तृष्णापराधीनो वास्तविकं सुख-मनुभवितुं नैव शक्नोति। वास्तविकं सुखं तु सन्तोष एव विद्यते। यथोक्तं सुभाषिते—

> सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्।
> सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः॥

यावज्जनः सन्तोषं हृदये न करोति तावन्नव-नवाभिलाष-मृगमरीचि-कायाम् अतृप्तः सुखं न प्राप्नोति। यतो हि यावदेका मनःकामना पूर्णा भवति तावद् द्वितीया समुत्पद्यते। यावद् द्वितीया पूर्णा भवति तावत् तृतीया सञ्जायते। एवं हि सन्तोषस्याभावे तृष्णापरवशः सुखप्राप्तये चेखिद्यमानः सुखसातत्यं नैव प्राप्नोति। अतः सन्तोषजलेन तृष्णावह्नि-प्रशमनं परमम् आवश्यकम्। यथोक्तम्—

> या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यताम्।
> तां तृष्णां संत्यजन् प्राज्ञः सुखेनैवाभिभूयते॥

कामानामुपभोगेन कामो न शाम्यति, अपि तु यथा हविषा अग्निः प्रवर्धते तथैव भूयोभूयः उपभोगेन कामः संप्रवर्धते। विषयेऽस्मिन् मनुः प्रबोधयति—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

सन्तोषाभावे मानवस्य यादृशी दशा भवति तस्याश्चित्रं सम्यगेव चित्रितं मनुस्मृतिकारेण । यथा—

इच्छति शती सहस्रं सहस्री लक्षमीहते ।
लक्षाधिपश्च राजत्वं राज्यस्थः स्वर्गमीहते ॥

श्रूयते पुरा किल चक्रवर्ती सम्राड् ययातिः स्वपुत्रस्य पुरुनामधेयस्य वयसापि देवयानीशर्मिष्ठाभ्यां सह वनेषूपवनेषु कमनीयेषु पर्वतप्रान्तेषु रममाणः कामानामन्तं न जगाम ।

सन्तोषपीयूषपानतृप्तानां शान्तमानसानां सुखस्य तुलनां कर्तुं धनलुब्धा इतश्चेतश्च धावन्तो वराकाः धनिकाः न शक्नुवन्ति । सुष्ठूक्तं सुभाषिते--

सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥

आत्मनि सन्तुष्टः सततं प्रमोदते । यथोक्तम्—

सर्वदा सम्पदस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥

नीतिविद्भिरन्यैरपि विद्वद्भिः सुविचार्य प्रोक्तं यत् कलत्रे भोजने धने च त्रिषु संतोषः करणीयः, परन्तु अध्ययने जपे दाने च त्रिषु कदाचिदपि सन्तोषो न करणीयः । गीतायामपि कथितं यत्—

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥

एतत्सर्वं मीमांसमानेन चाणक्येन समुदीरितम्—

असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभुजः ।
सलज्जागणिका नष्टा-निर्लज्जाश्च कुलाङ्गनाः ॥

परन्तु इमान्यपवादवचनानि । एतेषां वचसां क्वाचित्की प्रवृत्तिः । परमार्थतः सन्तोषसन्निभमन्यत् सुखं नैव वर्तते । सर्पाः पवनं निपीयापि

दौर्बल्यं न भजन्ते। शुष्कप्रायाणि तृणानि भुक्त्वा वनगजा बलवन्तः एव। मुनयः कन्दैः फलैरेव वृत्तिमुपकल्प्य परमाः सिद्धीः अवाप्नुवन्ति। एवं हि सिद्ध्यति यत् सन्तोष एव पुरुषस्य परं निधानं वर्तते। यथोक्तं नीतिशतके भर्तृहरिणा—

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम्॥

—:०:—

सङ्घे शक्तिः कलौ युगे
(एकता)

कृतयुगे त्रेतायां द्वापरे च तादृशानां तपस्विनां बलधाम्नां च नामानि श्रूयन्ते ये तपसा बलेन च जगति अभीष्टानि प्राप्तुं सर्वान् विघ्नान् दूरयितुं च समर्था आसन्। अनर्थकारिणं शापेन निग्रहीतुं सदाचारिणं विनयिनं चानुग्रहीतुं प्रभवोऽभूवन्। परमस्मिन् कलौ युगे तादृशानां सर्वशक्तिसम्पन्नानां महात्मनाम् अभाव एव। वर्तमानयुगे सङ्घशक्तेः फलं सुव्यक्तम्। यद्यपि सङ्घशक्तिः पूर्वयुगेष्वप्यासीत्, परन्तु सम्प्रति सङ्घशक्तेः आश्रयो विशेषेण फलदायकः।

श्रूयते कश्चिद् वृद्धो विद्वान् स्वपुत्रान् परस्परं कलहायमानान् दृष्ट्वा भृशम् उद्विग्न आसीत्। अथ स मृत्युवेलाम् उपस्थितां दृष्ट्वा पुत्राणां पारस्परिककलहेन संतप्तस्तान् आकारयामास। आगतान् पुत्रान् स अङ्गुष्ठतुल्यपीनानि हस्तपरिमाणलम्बानि काष्ठान्यानेतुम् आदिष्टवान्। यदा ते तादृशानि काष्ठान्यानीतवन्तस्तदा वृद्धस्तानि काष्ठानि रज्ज्वा बद्धुमकथयत्। निबद्धानि तानि भङ्क्तुमादिदेश। सर्वे पुत्राः त्रोटयितुम्

परमं प्रयत्नमकुर्वन् परं कोऽपि त्रोटयितुं न शशाक। अथ स वृद्धस्तानि काष्ठानि बन्धनविरहितानि कृत्वा एकैकं काष्ठं पुत्राणां हस्ते धृत्वा त्रोटयितुम् अकथयत्। तथा कृते सर्वे तनयाः एकैकं काष्ठं त्रोटयितुं समर्था अभवन्। तदा पितोवाच—अपि युष्माभिरस्याशयोऽवगतः? यथा यूयम् एकैकं काष्ठं भङ्क्तुं समर्था अभवत, किंतु तदेव काष्ठम् अपरैः काष्ठैः सह-निबद्धं भंक्तुं न प्राभवत। एवमेव एकाकी जनः शत्रुभिः पराभवितुं शक्यते। सङ्घबद्धः स एव जनः शत्रुभिः अभिभवितुं न पार्यते। अतो युष्माभिरेकतासूत्रेनिबद्धैर्भूत्वा संसारकर्मसु प्रवर्तितव्यम्।

अल्पशक्तयोऽपि जना सङ्घशक्त्या प्रबला भवन्ति। सङ्घशक्तेः प्रबलतायै सङ्गतेः संवादस्य मनसां सामञ्जस्य च आवश्यकता अनिवार्या। यथोक्तं वेदे--

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे संजानाना उपासते॥

सङ्घशक्तेः शिक्षा प्रकृतयाः अपि ग्रहीतुं शक्यते। निर्बलैस्तृणैः विरचितया रज्ज्वा मत्ता गजराजा निबध्यन्ते। यथोक्तम्—

बहूनामप्यसाराणां समवायो हि दुर्जयः।
तृणैरावेष्ट्यते रज्जुर्येन नागोऽपि बध्यते॥

श्लोकोऽयम् अन्यप्रकारेणापि पठितः। यथा--

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥

एकैकया इष्टिकया भवनानि निर्मीयन्ते, सेतवो विरच्यन्ते, महान्तो बन्धाः निबध्यन्ते। एकैकेन विन्दुना घटाः पूर्यन्ते। एकैकेनान्नकणेन अन्नराशयः सञ्चीयन्ते।

भगवान् रामः सङ्घटनशक्तेर्महान् प्रयोक्ता आसीत। सीतापहरणानन्तरं रावणस्य प्रतीकाराय स वनेचराणां वानराणां भल्लूकानाञ्च महतीं सेनां सङ्घटितां कृत्वा प्रथमं दक्षिणपयोधौ अभूतपूर्वम् अद्भुतं सेतुं कारयामास। ततो रावणस्य विशालां वाहिनीं विशालतरेण निजेन

वानरभल्लूकमयेन सैन्येन मर्दयाम्बभूव । सङ्घशक्तेरिदम् अत्युत्कृष्टतमम् उदाहरणम् ।

यदास्माकं देशे पारस्परिकेर्ष्याद्वेषभावैः "सङ्घे शक्तिः कलौ युगे" इति सिद्धान्तेऽनास्था जाता तदैवास्माकं देशवासिनः शत्रुभिः पराजिताः। तदाप्रभृत्येव भारतीयानां परतन्त्रतायाः प्रारम्भः प्रारब्धः ।

आंग्लानां शासनकाले भारतीयानां मानसेषु पुनः सङ्घशक्तिं प्रति विश्वासः समुद्भूतः। इयं सङ्घशक्तिः लोकमान्यतिलक-गान्धि-जवाहरलाल-सरदारपटेल-लालालाजपतराय-प्रभृतिभिः नेतृभिः सुभाषचन्द्रबोस-भगतसिंह-चन्द्रशेखर 'आजाद'-प्रभृतिभिः क्रान्तिकारिभिश्च वृद्धिं नीता भारतं परतन्त्रतापाशाद् उद्धृतवती । इदानीमस्मदीयं दायित्वं यद् वयं सङ्घशक्तिद्वारा समुपलब्धं स्वातन्त्र्यं सावधानतया रक्षेम ।

स एव परिवारः, स एव ग्रामः, स एव देशः सर्वविधं सौख्यमवाप्नोति यः सङ्घशक्तेर्महिमानं हृदये कृत्वा तदनुसारं जीवनचर्यां स्थापयति । सङ्घशक्तेर्लाभाः सर्वविदिताः । परन्तु अत्रैतद् ध्यातव्यं यदस्माभिः सत्कार्याणां कृते एव सङ्घशक्तेः प्रयोगः कर्तव्यः । यदि जनाः असत्कार्याय सङ्घशक्तेः प्रयोगं करिष्यन्ति तदा तस्या दुरुपयोगो भविष्यति । अतो विवेकपूर्वकमेव सङ्घशक्तिः प्रयोक्तव्या ।

--:o:--

धर्मो रक्षति रक्षितः

ध्रियतेऽनेनेति धर्मः । येन नियमसमूहेन प्रजायाः धारणं क्रियते स धर्मः इति महर्षेः व्यासस्य मतम् । यथा—

धारणाद् धर्म इत्याहुर्धर्मो धारयति प्रजाः ।
यत्स्याद् धारणसंयुक्तं स धर्म इति निश्चयः ॥

महर्षिः कणादो धर्मस्य सुविशदं लक्षणं कृतवान्—

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।

अर्थाद् यद्द्वारा सांसारिकविकासस्य तथा पारलौकिकस्य कल्याणस्य सिद्धिः भवति स 'धर्मः' इति पदेन व्यपदिश्यते। तस्य च धर्मस्य दश लक्षणानि प्रोक्तानि धर्मग्रन्थेषु। यथा –

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्॥

यो धर्मं प्रति समादरवान् भवति, धर्मं रक्षति, धर्मोऽपि तस्य सुरक्षां करोति। कैकेय्याः वचनानुसारं चतुर्दशवर्षाय वनं प्रव्रजन्तं रामं तन्माता कौशल्या ब्रूते स्म—वत्स! यं धर्मं त्वं प्रेम्णा नियमेन च परिपालयसि स धर्मः एव त्वां परिपालयतु—

यं पालयसि धर्मं त्वं प्रीत्या च नियमेन च।
स वै राघवशार्दूल! धर्मस्त्वामभिरक्षतु॥

वसुधाधिपत्यं हि वायुप्रेरितमेघवच्चञ्चलं वर्तते। विषयास्तावदेव सुखयन्ति। प्राणाः तृणाग्र-संस्थित-जलविन्दुवच्चंचलाः सन्ति। मरणानन्तरं परलोकयात्रायां केवलं धर्मं एव मित्रं भवति। यथोक्तं सुभाषिते—

धर्मः सखा परमहो परलोकयाने।

भगवान् विश्वभावनोऽपि यदा लोके धर्मस्य ह्रासो भवति, अधर्मस्य च अभ्युत्थानं जायते तदा सज्जनानामुपरि अनुग्रहं कर्तुं दुष्टानां च निग्रहं कर्तुं लोके धर्मस्य स्थापनायैव अवतारं गृह्णाति। यथोक्तं श्रीमद्भगवद्गीतायाम्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः' इत्यस्य रामायणे महाभारते पुराणेषु अन्येषु च काव्यनाटकादिषु प्रचुराणि उदाहरणानि समुपलभ्यन्ते। यो यादृक् पुण्यं पापं वा करोति स तदनुरूपमेव फलं भुङ्क्ते इति धर्मग्रन्थानां सुदृढं मतम्।

धर्मपरिपालनस्य सुखान्तं महिमानं ज्ञात्वैव विदुरो युधिष्ठिरं धर्मस्य परिपालनाय समुपदिशति स्म यत् कदाचिदपि कामात्, लोभात्, भयात्, प्राणविपत्तिकारणाद् वा धर्मं न परित्यजेत् । यथा—

इदं च त्वां धर्मपरं ब्रवीमि
पुण्यं पदं तात ! महाविशिष्टम् ।
न जातु कामान्न भयान्न लोभाद्
धर्मं त्यजेज्जीवितस्यापि हेतोः ॥

रावण-कंस-दुर्योधन-नरकासुरादयो धर्महननाद् अपयशभाजो भूत्वा तादृशं मरणं प्रापुः । अपरे च युधिष्ठिरादयो धर्मं रक्षित्वैव कीर्तिभाजो भूत्वा शुभां गतिं लोकसमादरं च प्राप्तवन्तः । अतः सम्यगेवोक्तं—'धर्मो रक्षति रक्षितः' इति ।

—:o:—

न हि सत्यसमो धर्मः

(सत्यमेव जयते नानृतम्)

यद् यादृशं वर्तते तस्य तादृक् कथनं स्वीकरणं वा सत्यं कथ्यते । धर्मे सत्यस्य सर्वोत्कृष्टं स्थानम् अस्ति । महाभारते महर्षिणा व्यासेन धर्मस्याङ्गानां मध्ये सत्यस्य सर्वश्रेष्ठता प्रतिपादिता--

न हि सत्यसमो धर्मो न सत्याद् विद्यते परम् ।
न हि तीव्रतरं किञ्चिदनृतादिह विद्यते ॥

जगतीतले सर्वेषु सत्यस्य महत्त्वं सर्वोपरि स्वीकृतम् । सर्वदा सत्यभाषणेन वाण्याम् अप्रतिहता शक्तिः समुत्पद्यते इति महर्षिणा पतञ्जलिना योगसूत्रे स्वीकृतम् । यथा—

"सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ।"

मनुस्मृतौ मनुना दशके धर्मलक्षणे सत्यं परिगणितम्—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

महर्षिः पतञ्जलिः सत्यं यमानां मध्ये परिगणितवान्—

"अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः यमाः ।"

अस्माकं देशे सत्यभाषणस्य सत्याचरणस्य च बहूनि निदर्शनानि सन्ति । महाराजो हरिश्चन्द्रः दक्षिणां दातुं वाराणस्याम् आत्मानं चाण्डालहस्ते, पत्नीं शैव्यां पुत्रं रोहितं च मालाकारहस्ते विक्रीतवान् । न केवलम् एतदेव, अपि तु मृतस्य पुत्रस्य रोहितस्य अर्धं शववस्त्रं चाण्डाल-निर्देशानुसारं गृहीत्वैव श्मशानभूमौ शवदाहस्य अनुमतिं दत्तवान् । तस्य तादृशीं सत्ये व्यवस्थितिं दृष्ट्वा भगवान् दर्शनं ददौ । तस्य पुत्रं जीवयामास । पुनः राज्यासीनं कृतवान् । अन्ते च सत्यपालन-प्रभावात् स्वर्गे शाश्वतीम् अवस्थितिं लब्धवान् ।

एवमेव महाराजो दशरथः सत्यं प्रमाणीकृत्य कैकेय्यै पूर्वप्रतिश्रुतं वरद्वयं ददौ । तदर्थं प्राणेभ्योऽपि प्रियतरं पुत्रं रघूत्तमं रामं वनं प्रेषितवान् प्राणाँश्च जहौ, परन्तु सत्यं न परित्यक्तवान् ।

महाराजो युधिष्ठिरो द्यूते पराजितः सत्यनियन्त्रितः शक्तः सन्नपि द्वादशवर्ष-वनवासावधौ एकवर्षस्य च अज्ञातवासावधौ महान्ति कष्टानि सोढवान्, परन्तु सत्यवचनस्य परित्यागं न कृतवान् । धर्मस्य रक्षा सत्येनैव भवति । यथोक्तम् —

"सत्येन रक्ष्यते धर्मः" इति ।

शाश्वतस्य सुखस्योपलब्धये दृढतया सत्यस्य परिपालनं कर्तव्यम् । यतो हि सर्वत्र सत्यस्यैव विजयो भवति । असत्यम् अन्ततः पराजयते । यथोक्तम् उपनिषदि—

"सत्यमेव जयते नानृतम्" इति ।

सत्यभाषण-नियमेन मानवस्य सर्वे दोषाः विलीयन्ते । स्तेयादिषु दुष्कर्मसु प्रवृत्तिरेव न भवति । अतः प्राचीनकाले समधीतविद्यानां छात्राणां समावर्तन-संस्कारावसरे आचार्याः सर्वप्रथमं सत्यभाषणाय उपदिशन्ति स्म । यथा —

"सत्यं वद । धर्मं चर इत्यादि ।

सत्यभाषणं सर्वोत्तमो धर्मो वर्तते । परम् अप्रियस्य सत्यस्य भाषणम् मनुः निषेधति—

सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥

महाभारते सत्यस्य महिमानं प्रतिपादयन् भगवान् व्यासः ब्रूते यद् अश्वमेधानां सहस्रमपि सत्येन तुल्यं न भवति । सर्वेषां वेदानामध्ययनम्, सर्वेषां तीर्थानामवगाहनम् अपि सत्यभाषणसन्निभं न भवति । यथोक्तं महाभारते—

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥
सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् ।
सत्यं च वचनं राजन् समं वा स्यान्नवा समम् ॥

—:०:—

उदारचरितानां तु वसुधैव कुटुम्बकम्

अस्माकं पूर्वजाः ऋषयोः मानवतायाः विकासाय "वसुधैव कुटुम्बकम्" इति भावयामासुः । यथा प्रत्येको जनः स्वकुटुम्बकस्य कल्याणाय यथाशक्ति प्रयतते तथैव यदि मानवो जगतीतलगतानां सर्वेषां प्राणिनां कृते कल्याणभावनया प्रयतते तर्हि संसारस्य दुःखानि दूरीकर्तुं शक्यन्ते ।

पारस्परिक-कुटुम्बभावनया न कश्चित् कस्यचिद् अनिष्टं चिन्तयिष्यति । अनिष्टेऽचिन्तयति संघर्षाणां युद्धानां च विभीषिका स्वतः एव अपसर्पिष्यति । पारस्परिककुटुम्बभावनया न कश्चित् कस्यचिद् भागम् अपहरिष्यति, न च कश्चित् कस्यचिद् वस्तु चोरयिष्यति । अनेन प्रकारेण यदि सर्वो जनः स्वानुभावस्य विकासं कुर्यात् तदा पुनः कृतयुगः प्रवर्तेत ।

अस्माकं भारतीयानां यज्ञानाम् अन्ते सर्वेषां देशगतानां देशान्तरभवानां च प्राणिनां कल्याणाय परमात्मा प्रार्थितः, प्रार्थ्यते च साम्प्रतिकैः धार्मिकैः यथा— सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।

इयं प्रार्थनायाः सर्वोत्कृष्टा रीतिः । यतो हि यावत् सर्वे सुखिनो न भविष्यन्ति तावद् येन केन प्रकारेण अस्माकमपि सुखं विघ्नितं भविष्यति । यथा यद्यहं सुखी परम् अस्माकं भ्राता कष्टापन्नः तर्हि तस्य भ्रातुः कष्टं वीक्ष्य कथम् अहं सुखी भविष्यामि । अस्माकं सार्वदिकं सुखं तदैव भविष्यति यदा अस्माकं परिवारस्य, ग्रामस्य, नगरस्य, देशस्य, विश्वस्य च सर्वे जनाः सुखिनो भविष्यन्ति ।

महाभारते यक्षयुधिष्ठिरसंवादे यक्षेण पृष्टम्—'परमो लाभः कः ?' युधिष्ठिरेण प्रत्युक्तम्—"आरोग्यं परमो लाभः" इति । अस्यैव परमस्य लाभस्य कृते भगवान् प्रार्थितः "सर्वे सन्तु निरामयाः" । श्लोकस्य अस्मिन्नप्यंशे सर्वेषां विश्वजातानां जीवानां कृते प्रार्थना कृता ।

"सर्वे भद्राणि पश्यन्तु" इत्यंशेऽपि विश्वगतानां सर्वेषां प्राणिनां कृते कल्याणकामना विहिता । यतो हि यद्यहं कल्याणभाक्, किन्तु अस्मद्भ्राता कल्याणवञ्चितः तर्हि तस्य दुःखं दर्शं दर्शं केन प्रकारेण अस्माकं सुखं सुरक्षितं भविष्यति । अत एव अस्मिन्नंशे सर्वेषां कृते कल्याण-प्राप्तिकामना कृता वर्तते ।

"मा कश्चिद् दुःखभाग् भवेत्" इति श्लोकस्य अन्तिमेंऽशेऽपि विश्वस्य सर्वेषां प्राणिनां कृते दुःखराहित्याय भगवान् प्रार्थितः । यतो हि यद्येकोऽपि जनो दुःखं भुनक्ति तर्हि तस्य दुःखं दृष्ट्वा केन प्रकारेण अस्मदीयं सुखं सुरक्षितं भविष्यति ? अतः सर्वेषामेव दुःखस्य निराकरणाय भगवान् प्रार्थितः ।

"अयं निजः, अयं परः" इति भावनैव संसारे बहूनां कष्टानां कारणम् अस्ति । अनया भावनयैव अयमस्मदीयो देशः, अयं परकीयो देशः । अयम् अस्मज्जातीयः, अयं परजातीयः । अयम् अस्मदीयो धर्मः, अयं

परकीयो धर्मः। इयम् अस्मदीया भाषा, इयं परकीया भाषा। अयं मित्रवर्गः, अयं शत्रुवर्गः इति भासते। इयं भावनैव एकामेव पृथ्वीं नानादेशेषु विभनक्ति, एकामेव मनुष्यजातिं बहुधा विभाजयति, एकमेव मानववर्गं मित्रेषु शत्रुषु च विभक्तं कुरुते।

अयं निजः परो वेति भावनैव जगतीतले महतां भीषणानां युद्धानां कारणं बभूव, अस्ति च। संसारस्य एकसद्दशेषु मानवेषु इयमेव भावना वैषम्यं जनयामास, जनयति च। इयं भावनैव प्राणिषु घृणां, रोषं, क्रौर्यं च जनयति। इयं भावनैव पारस्परिकम् अविश्वासम् उत्पादयति। इयं भावनैव इदानीं समग्रं विश्वं मृत्यु-मुख-सम्मुखं नीतवती वर्तते।

क्षुद्रभावनां दूरीकृत्य औदार्यं हृदि निधाय "वसुधैव कुटुम्बकम्" इति भावनया कार्यसम्पादनाय निर्दिष्टवन्तो मनीषिणः ऋषयः। यथा—

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

—:०:—

योगः कर्मसु कौशलम्

श्रीमद्भगवद्गीतायां कर्मयोगस्य ज्ञानयोगस्य भक्तियोगस्य च स्थले स्थले प्रतिपादनं कृतं भगवता श्रीकृष्णेन। एतद् योगत्रयं परस्परापेक्षि वर्तते। यथा—कर्मयोगः ज्ञानयोगः सिद्ध्यै परमावश्यकः। ज्ञानयोगः कर्म-भक्तियोगौ समपेक्षते। एवमेव भक्तियोगः कर्म-ज्ञानयोगौ विना न सिद्ध्यति। भक्तियोगाद् ऋते कर्मयोगे ज्ञानयोगे वा जनस्य आस्था सुदृढा न भवति। भक्तियोगः उभयत्र संसक्तः। इत्थं विचार्यैव गीतायाम् प्रामुख्येन कर्मयोगस्य ज्ञानयोगस्य च एकत्वं समफलत्वं च प्रतिपादयता योगेश्वरेण श्रीकृष्णेनोक्तम्—

सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥

अत्र सांख्यपदं ज्ञानवाचकम्। 'सांख्ययोगौ' इत्यस्य ज्ञानयोगः कर्मयोगश्चेत्यर्थौ स्तः। द्वावपीमौ योगौ निःश्रेयस्करौ प्राणिनाम्। एतयोर्मध्ये कर्मयोगो विशिष्यते। यथोक्तं गीतायाम्—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥

कर्मयोगस्य वैशिष्ट्यादेव श्रीकृष्णः पार्थं 'कर्मण्येवाधिकारस्ते' इत्याद्युपदिश्य योगस्थः सन् कर्माणि कुर्वित्यादिश्य सिद्ध्यसिद्ध्योः समभावो योग इति परिभाषितवान्—

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

'योगः कर्मसु कौशलम्' इत्यत्र कर्मसु कौशलमिति पदेन फलप्राप्तिकामनाराहित्यं साफल्यासाफल्ययोर्हर्षविषादशून्यत्वं कर्मफलनिरासाय कर्मफलस्य परमात्मने समर्पणमित्याद्यर्थाः अभिप्रेताः।

'योगश्चित्तवृत्तिनिरोधः' इति पातञ्जलयोगसूत्रम्। अस्यार्थः स्थूलदृष्ट्या भिन्नः प्रतीयते, परमिदं सूत्रं योगः कर्मसु कौशलमित्यस्यैवाशयं विशदीकरोति। चित्तस्य वृत्तेर्निरोधे सत्येव हर्षविषादयोः सिद्ध्यसिद्ध्योश्च समत्वं भवितुमर्हति।

चित्तवृत्तेर्निग्रहोऽभ्यासेन वैराग्येण च कर्तुं शक्यते। यदार्जुनो भगवतः कृष्णस्य ध्यानं मनसश्चाञ्चल्यं प्रति तस्य वायोरिव वशीकरणं दुष्करमिति कथयन् समाकर्षति स्म तदा योगेश्वरो मनसो वशीकाराय अभ्यासस्य वैराग्यस्य चावश्यकतां प्रतिपादयामास—

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

योगसूत्रेऽपि चित्तवृत्तेर्निग्रहाय अभ्यासवैराग्ययोरावश्यकता प्रपादिता— 'अभ्यासवैराग्याभ्यां तन्निरोधः' इति।

कर्मयोगस्य महिमा कथमपि ज्ञानयोगान्न्यूनो नास्ति। यत् परमं

पदं ज्ञानयोगनिरतैः प्राप्यते तदेव स्थानं कर्मयोगिभिरपि लभ्यते। अतस्तत्त्ववेत्तारो द्वावपि समानौ मानयन्ति। यथा--

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥

योगाद् ऋते संन्यासत्वं दुष्करम्। योगयुक्तो मुनिरविलम्बेन ब्रह्म प्राप्नोति-- संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥

योगलग्नः तपस्विभ्यो ज्ञानिभ्यः कर्मिभ्यश्च अधिको भवति। यथा--

तपस्विभ्योऽधिको योगी
ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी
तस्माद्योगी भवार्जुन ॥

'योगी परं स्थानमुपैति चाद्यम्' इत्यादिभिर्योगिनो महान् महिमा प्रतिपादितः। योगिनो महत्त्वं वस्तुतो योगस्यैव महत्त्वं वर्तते। अत एव समीचीनं समुदीरितं 'योगः कर्मसु कौशलम्' इति।

—: ० :—

न्याय्यात् पथः प्रविचलन्ति पदं न धीराः

(न निश्चितार्थाद् विरमन्ति धीराः)

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥

इयं भर्तृहरिशतकस्योक्तिः न्यायमार्गावलम्बिनां धीरपुरुषाणां स्वभावस्य विवरणम् उपस्थापयति। धीरपुरुषाः प्राक् सुविचार्य यं न्यायसङ्गतं मार्गं स्वीकुर्वन्ति निन्दायाम् उताहो स्तुत्यां संजातायां न परित्यजन्ति। धनसम्पत्तिः प्रवर्धताम् अथवा विनाशनम् उपगच्छतु, परन्तु धीराः न्यायसङ्गतान्मार्गात् पदमपि न विचलन्ति। मृत्युरपि अद्यैव भवतु आहोस्विद् युगानां पश्चाद् भवतु, परन्तु धीरपुरुषाः नयसङ्गतं मार्गं न परिहरन्ति। "न सत्यमार्गाद् विरमन्ति धीराः" इति सूक्तिरपि इममेव अभिप्रायं विशदीकरोति।

भर्तृहरेः इयं सूक्तिः सर्वाणि क्षेत्राणि प्रभावयति। यथा हि राजा हरिश्चन्द्रः सत्यपरिपालनं सर्वाधिकं न्यायसङ्गतं विभाव्य सत्यालापपरायणो बभूव। सत्यस्य रक्षायै स महतीः विपत्तीः सोढ्वापि सत्यमार्गं न जहौ। महाराजो दशरथोऽपि सत्यवचन-सिद्धान्तस्य रक्षायै सीतालक्ष्मणाभ्यां सह प्रियं पुत्रं रामं जहौ किन्तु सत्यवचनं न परित्यक्तवान्। राजा शिविः सुविचार्य दयाव्रतम् अङ्गीकृतवान्। दानवीरः कर्णोऽपि ब्राह्मणवेशाय याचकाय इन्द्राय स्वशरीरसन्नद्धं कवचं कुण्डले च प्रायच्छत्, परन्तु अङ्गीकृतं दानव्रतं न तत्याज। महाराजो युधिष्ठिरोऽपि सत्यस्य रक्षायै वनवासस्य अज्ञातवासस्य च महान्ति कष्टानि सोढवान् परन्तु सत्यमार्गात् पदमपि न विचचाल।

मर्यादापुरुषोत्तमो रामोऽपि प्रजानुरञ्जनमार्गं नृपतेः कृते न्यायसङ्गतं इति कृत्वा राज्यारोहणसमये प्रजानुरञ्जनव्रतं गृहीतवान्। अत एव अधुनापि सुराज्यस्य कल्पनायां "रामराज्यम्" एव सुधियां चेतःसु सुप्रतिष्ठितम् भवति। महात्मा गान्धिरपि अस्मादेव कारणाद् भारते रामराज्यस्य स्थापनां कर्तुम् इच्छति स्म। योगिराजः कृष्णोऽपि खलानां निग्रहस्य सज्जनानां च परित्राणस्य न्याय्यं व्रतं गृहीतवान्।

स्वतन्त्रताव्रती महाराणा प्रतापोऽपि सम्राजोऽकबरस्य प्रलोभान् विहाय स्वकीयं स्वतन्त्रताव्रतं स्वपरिवारेण सार्धं तृणरोटिकाः

खादित्वापि न जहौ। महाराष्ट्रकेसरिणः शिववीरस्य पराक्रम-क्रमं को नाम भारतीयो न जानाति यः स्वातन्त्र्य-ज्योतिः प्रज्वलनाय यावज्जीवनम् औरङ्गजेबसेनया सार्धं संघर्षं कृतवान्। झांसीमहाराज्ञी लक्ष्मीबाई अपि अङ्गीकृतं स्वतन्त्रताव्रतं रक्षन्ती यावत्प्राणं आंग्लशासकैः सह युद्धं कृतवती।

तिलक-गान्धि-जवाहरलाल-सरदारपटेल-सुभाषचन्द्रबोस-भगतसिंह-प्रभृतयः स्वतन्त्रतासङ्ग्रामयोद्धारः अङ्गीकृतं स्वतन्त्रतासंग्रामम् आरभ्य कदापि न विरमन्ति स्म।

अस्यां पवित्रायां भारतभुवि अन्येऽपि सहस्रशः न्यायव्रतिनो बभूवुः, ये स्वीकृतसिद्धान्तानां परिपालनाय स्वजीवनं समर्पयामासुः, परन्तु अङ्गीकृतम् न्याय्यं मार्गं न परित्यक्तवन्तः। अतो भर्तृहरिणा न्याय्यमार्गावलम्बिनां धीरपुरुषाणां विषये समीचीनमेवोक्तं—"न्याय्यात्पथः प्रविचलन्ति पदं न धाराः" इति।

—:०:—

सहसा विदधीत न क्रियाम्

इयं सूक्तिः महाकविभारविविरचिते किरातार्जुनीये महाकाव्ये सुशोभते। यदा भीमसेनः 'शत्रुषु शीघ्रं प्रतिविधेयम्' इति द्रौपदीसमुदीरितां वाचं समर्थयन् समुद्योगाय महाराजं युधिष्ठिरं प्रेरयामास तदा युधिष्ठिरो भीमं परिसान्त्वयन् प्रतिवदति स्म—

सहसा विदधीत न क्रियाम्
अविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः॥

अस्मिन् पद्ये सहसापदम् अविमृश्यकरणे प्रयुक्तम्। केनचिदपि अवि-

चारितं कार्यं न करणीयम्, यतो हि अविवेको महतीनां विपत्तीनां कारणं भवति। गुणलुब्धाः सम्पदः सुविचार्यं कार्यसम्पादकस्य जनस्य स्वयमेव वरणं कुर्वन्ति।

इतिहासेषु पुराणेषु साहित्यग्रन्थेषु च अस्याः सूक्तेः समर्थकानि प्रचुराणि उदाहरणानि सन्ति यद् अविमृश्यकारिणो जनाः सहसा कार्यं कृत्वा विपदां वारिधौ निमग्नाः। इयं सूक्तिः अस्माकं दैनिके व्यवहारे महत्त्वपूर्णां भूमिकां निर्वहति। अत एव सर्वदैव स्मरणीया वर्तते। कैकेयो सहसा (सज्जनैः सह अविमृश्य) कोपभवनं गत्वा रामायव नगमनं भरताय राज्यम् इति वरद्वयं याचित्वा पराविपत्ति प्राप। तेन सा विधवा भूत्वा सर्वस्यैव निन्दास्पदं बभूव। स्वपुत्रेण भरतेनापि धिक्कृता। अद्यापि सा सपत्नीदोषस्य उपमानं वर्तते। बाली मायाविनं नाम मयासुरतनयं निहत्य मासानन्तरं यदा पम्पाराजधानीं प्रतिनिवृत्तः, तदा तत्र सुग्रीवं राजसिंहासनासीनं दृष्ट्वा भृशं चुकोप। सहसा (अविमृश्य) सुग्रीवस्य कलत्रादिकं सर्वं हृत्वा तं निर्वासितवान्। इयमेव घटना तस्य तादृशस्य अन्तस्य कारणं बभूव। दुर्योधनोऽपिः द्यूतपराजितानां पाण्डवानां पत्न्या द्रौपद्या सह चीरहरणात्मकं व्यवहारं सहसा कृत्वा कालान्तरेण समूलं नाशं प्राप्तवान्। अतएव विमृश्य कार्यकरणमेव समीचीनम्।

—: ० :—

चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च

(चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः)

अथवा (नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण)

मानवलोकेऽस्मिन् क्रमशः सुख-दुःखयोः गमनागमने भवतः इति समेषामनुभवः। श्रूयते यद् वैकुण्ठादिषु लोकेषु दुःखस्यैकान्तहानिरस्ति,

परन्तु पृथिव्यां दुःखस्यात्यन्ताभावो नास्ति। इह तु क्रमात् सुख-दुःखयोः प्रवृत्तिर्दृश्यते। अयमेवानुभवः कविकुलगुरुणा महाकविना कालिदासेन मेघदूते यक्षमुखेन प्रियां प्रति संदिशता संप्रस्तुतः—

कस्यैकान्तं सुखमुपगतं दुःखमेकान्ततो वा।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

शास्त्रेषु "अनुकूलवेदनीयं सुखम्" "प्रतिकूलवेदनीयं दुःखम्" इति सुखदुःखयोः परिभाषे कृते वर्तेते। इत्थंप्रकारेण भावनेन बहूनामीर्ष्यादि-जन्यानां दुःखानां प्रतीकारः सरलरीत्यानुष्ठीयते। परन्तु कानिचिद् दुःखानि एवम्प्रकाराण्यपि सन्ति यानि वास्तविकदुःखत्वेन लोके सुप्रतिष्ठितानि विद्यन्ते। पिपासा-बुभुक्षा-रोग-जरा-मरणादीनि दुःखानि कं न सन्तापयन्ति ? परन्तु जीवलोकेऽस्मिन् सुखदुःखे क्रमशः सर्वैर्भोक्तव्ये भवतः। प्रकृत्यामपि अस्य सत्यस्य प्रचुराण्युदाहरणानि प्राप्यन्ते। सूर्यः प्रातः सामान्य इव दृश्यते। मध्याह्ने ललाटं तापयति। सायं पुनः क्षीणप्रभो भवति। चन्द्रमा अपि पूर्णिमायां पूर्णतां सम्प्राप्तः, अमायां लोपत्वं गच्छति, महाकवि कालिदासः समुद्घाटयति तथ्यमिदं शाकुन्तले—

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरस्कृत एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु॥

दिवसे प्रसन्नान्यपि कमलानि रात्रौ सम्पुटितानि दुःखमिवानुभवन्ति। एवमेव रात्रौ प्रसन्नं कुमुदकुलं दिवा संकुचितं शोकमिवानुभवद् भवति। वर्षतौं क्लेशमापन्नाः हंसाः शरदागमे हर्षमनुभवन्ति। इत्थं हि निखिलायां प्रकृतौ क्रमशः सुखदुःखयोः प्रचुराणि निदर्शनानि प्रसृतानि सन्ति।

सुखदुःखसंकुले जीवने यदि दुःखस्यान्तरं सुखं प्राप्यते तदा "क्लेशः फलेन हि पुनर्नवतां विधत्ते" इति नियमेन सुखान्तं दुःखं सहनीयं भवति। परन्तु यद् दुखं सुखस्य पश्चाद् भवति तदधिकं क्लेशाय कल्पते। उक्तं च महाकविशूद्रकविरचिते मृच्छकटिके—

सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ।।

दुःखं हि अनन्तभेदसंवलितमपि प्राधान्येन त्रिविधं विद्यते । दैहिकं दैविकं भौतिकं चेति दुःखत्रयम् अभिधीयते ।

अनन्तभेदयुक्तं सुखमपि श्रीमद्भगवद्गीतायां सात्त्विक-राजस-तामस-भेदात् त्रिविधं समुदीरितम् ।

एवं प्रकारेण जगतः कार्यकलापानां सुखदुःखसंवलितानाम् आकलनेन "चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च" इति कथनं सारवत् प्रतिभाति ।

—:०:—

त्याज्यं न धैर्यं विधुरेऽपि काले

(धैर्यं हि महतां धनम्, धैर्यधना हि साधवः)

आत्मनः स्थैर्यं हि धैर्यम् । विपत्तिकाले धैर्यमेव अवलम्बो भवति । मनुस्मृतौ दशके धर्मलक्षणे सर्वप्रथमं धैर्यं गणितम् ।

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

धैर्यप्लवेन मानवो विपन्नदीं विपत्तिवारिधिं वा तरति । यदि धैर्यं नाम सम्बलं न स्यात् तर्हि जीवनं दुःखकाले महत्तिमिराच्छन्नं भवेत् । धैर्येणैव मानवो महान् भवति । महात्मनां लक्षणे धैर्यं प्रथमत्वेन वर्तते—

विपदि धैर्यमथाभ्युदये क्षमा ।
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

जीवनं सुखदुःखमयं वर्तते। महाकविकालिदासग्रथिते मेघदूते यक्षः स्वां प्रियां प्रति मेघद्वारा सन्देशं प्रेषयन् कथयति—

कस्यैकान्तं सुखमुपगतं दुःखमेकान्ततो वा।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥

अर्थात् सुखं दुःखञ्च जीवनेऽनिवार्यम्। सुखे तु सर्व एव मोदन्ते। दुःखे एव मानवस्य स्तरस्य परीक्षा भवति। सामान्यास्तु दुःखागमे विषीदन्ति अधीरत्वात् यस्य कस्यापि समक्षं स्वदुःखं प्रकटयन्ति। वेदनाया असहनीयत्वे सत्यात्मघातं कुर्वन्ति। परन्तु ये महापुरुषा भवन्ति ते सुखे-दुःखे च समरसाः तिष्ठन्ति। न तु सुखेऽतिशयं मोदन्ते न च दुःखे भृशं विषीदन्ति। यथा भगवान् भास्करः उदयवेलायाम् अस्तमनकाले च ताम्रवर्ण एव तिष्ठति तथैव धैर्यवन्तः सुखदुःखयोर्लाभालाभयोश्च समरूपा भवन्ति।

पाण्डवा कपटद्यूतेन दुर्योधनादिभिः कष्टजलधौ निमज्जिताः द्वादश-वर्षात्मकस्य वनवासस्य एकवर्षात्मकस्य अज्ञातवासस्य च दुःखानि धैर्येण सोढ्वा धैर्यधनाः अन्ततः कौरवान् ससैन्यान् मर्दयित्वा राज्य-श्रियमलभन्त। भीष्मपितामहो धैर्यमहिमानं प्रतिपादयन् ब्रूते स्म महाभारते— **पुत्रदारैर्वियुक्तस्य वियुक्तस्य धनेन वा।**
मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी मता ॥

महाराणाप्रताप-शिववीरसदृशाः भारतभूमि-सम्मान-पताकायिताः धैर्यं पुरस्कृत्यैव स्वल्पैरेव साधनैर्देशस्य स्वतन्त्रतायै यावज्जीवनं मुगलशासकैः सार्धं युद्धमकुर्वन्।

यथा बाह्यान् शत्रून् जेतुं विघ्नान् विनाशयितुं च धैर्यस्यावश्यकता वर्तते तथैव काम-क्रोध-मद-लोभ-मोह-मत्सरादीन् आभ्यन्तरान् रिपून् पराजेतुं धैर्यमेवावलम्बनं भवति। अत एव 'धैर्यधनाः साधवः' इत्यु-च्यते। "धैर्यं हि महतां धनम्" इति चाभिधीयते।

भगवान् शिवः पूजनप्रसक्तायाः पार्वत्याः सन्निधौ चेतसि विकार-

कारिणं मन्मथं भस्मीकृत्य धैर्येण स्वकीयं नियमं ररक्ष । यथोक्तं कुमारसम्भवे—'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।'

इत्थमेतत् सिद्ध्यति यन्मानवेन यावच्छक्ति यावद्बुद्धि धैर्यमाश्रित्य विपदो दूरणाय सचेष्टेन भवितव्यम् । धैर्यपूर्वकं कर्मसु प्रवर्तनेन सफलता प्राबल्यं गच्छति । यथा नाविकाः समुद्रे पोतभङ्गे जाते सति बाहुभ्यामेव सागरं तर्तुमिच्छन्ति, तथैव जनैः दुःखकालेऽपि धैर्यं धृत्वा कर्मसु प्रवर्तितव्यम् । यथोक्तं सुभाषिते—

त्याज्यं न धैर्यं विधुरेऽपि काले
धैर्यात् कदाचित् स्थितिमाप्नुयात् सः ।
याते समुद्रेऽपि हि पोतभङ्गे
सांयात्रिको वाञ्छति तर्तुमेव ॥

—:o:—

अहिंसा परमो धर्मः

'मा हिंस्यात् सर्वभूतानि' इति वेदवचनं सर्वप्रथमम् अहिंसायाः प्रतिष्ठां करोतिस्म । ततः परम् अन्येषु धर्मग्रन्थेष्वपि अहिंसायाः परिपालनस्य समुद्घोषः कृतः । मनुस्मृतौ मनुरपि "दशकं धर्मलक्षणम्" इति धर्मलक्षणं लक्षयन् अहिंसामपि दशके धर्मलक्षणे पठितवान् । ततः परम् "अहिंसा परमो धर्मस्त्वहिंसा परमं तपः" इत्यादि प्रवचनम् प्राप्तप्रतिष्ठमभूत् ।

जगतः सर्वेष धर्मेषु अहिंसायाः परिपालनस्य आवश्यकता स्वीकृता । योगसूत्रेऽपि "अहिसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" इति सिद्धान्तः स्वीकृतः । अस्यायमाशयो यद् यदा जनः सर्वाङ्गरूपेण अहिंसायाम् आस्थावान् भूत्वा तदनुकूलं दिनचर्यां प्रतिष्ठापयति, तदा हिंस्रा जन्तवोऽपि तं प्रति वैरं परित्यजन्ति, किमुत शान्ता जीवा ।

भगवान् बुद्धः सर्वाधिकम् अहिंसां प्राचारयत्। बुद्धसमये हिंसापराणां यज्ञानामतीव प्रचार आसीत्। तेषु यागेषु तादृशं पशूनां वधप्राचुर्यं दृष्ट्वा महात्मनो बुद्धस्य नवनीतनिभं सुकोमलं हृदयं द्रवीभूतम्। अतः स महाभागः अहिंसाप्रतिष्ठार्थं यावज्जीवनं प्रयत्नवानभवत्।

महान् विजेता अशोकोऽपि कलिङ्गसंग्रामे लक्षशः सैनिकान् निहतान् दृष्ट्वा करुणापरो बौद्धधर्ममङ्गीकृत्य समग्ररूपेण अहिंसाव्रती संजातः। अशोको महान् अहिंसाप्रचाराय सर्वाधिकं प्रयत्नवान् बभूव।

आधुनिके युगे अस्माकं राष्ट्रपिता महात्मा गान्धी सुमहान् अहिंसा परिपालकः अभूत। स्वातन्त्र्यान्दोलने तेन अहिंसाशस्त्रं प्रयुक्तम्। तेन अहिंसाशस्त्रेण हिंसामन्तरेण पराधीनतापाशः छिन्नः। इयं तस्य महती विशेषता।

हिंसायां बहवो दोषाः सन्ति। केचिज्जिह्वास्वादाय पशून् निर्ममतया घ्नन्ति। तेषु राक्षसेषु च किमन्तरम्? तदुक्तम्—

योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्वियुज्यते॥

अहिंसाव्रत-परिपालनेन समाजे परस्परं विश्वासो द्रढोभवति। अथ विश्वासे द्रढीभूते सौमनस्यं संवर्धते। सौमनस्ये संवर्धिते संसारोऽयं स्वर्गायते।

परन्तु कस्मिन्नपि समाजे सर्वे जनाः समानविचारा न भवन्ति। खलानां दस्युवृत्तीनां निग्रहाय दण्डव्यवस्था आवश्यकी भवति। एवमेव शल्यचिकित्सादिषु यत् पीडनं भवति जनस्य तत् सोढव्यम्, यतो हि सा पीडा सुखोदकार्य संजायते। अतः खलु उत्पथगामिनां निग्रहाय अहिंसाया व्रतम् अस्वीकरणीयमेव।

राष्ट्रस्य रक्षायै अपि अहिंसा-नियमः शिथिलीकरणीयः। अस्माकं विश्वासो यद् अतिशयम् अहिंसापरिपालनमेव पुरा भारतं राष्ट्रं निर्बलमकरोत्। तत्कारणादेव अस्माकं राष्ट्रं सुदीर्घकालं यावद् दासतायाः बन्धने निबद्धमभवत्। सा दासतायाश्छाया अद्यपि भारतीयानां मानसेषु

दैन्यं सञ्चारयन्ती विद्योतते । अतः उत्पथगामिनां निग्रहाय राष्ट्रस्य सीमानां रक्षणाय च अहिंसाव्रतम् परिहर्तव्यमेव । किन्तु अन्यत्र अहिंसा-व्रतं कल्याणकारित्वात् परिपालनीयम् एव ।

—:o:—

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

(मातृभूमेः महत्त्वम् अथवा स्वदेशप्रेम)

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

उपरितनः श्लोकगतः उद्गारो भगवतः श्रीरामचन्द्रस्य मुखान्निर्गतः । वाल्मीकिरामायणे रावणवधानन्तरं यदा लक्ष्मणो लङ्कायाः श्रियं विलोक्य आश्चर्यचकितः आकृष्टश्च बभूव तदा पुरुषोत्तमो रामो जनन्याः जन्मभूमेश्च माहात्म्यं स्वर्गलोकादप्यधिकमिति समर्थयन् इमम् उद्गारं प्रकटयामास ।

या जननी गर्भधारणमारभ्य प्रसवपीडापर्यन्तं कष्टं सहमाना सन्ततेः पालनपोषणयोः स्वकीयं दायित्वं निर्वहन्ती सततं दत्तावधाना सन्तति रक्षति, तस्याः जनन्याः तुलनां कर्तुं न कश्चित् समर्थः । शैशवावस्थायां माता सन्ततेः मलं मूत्रं शरीरं वस्त्राणि च अनुदिनं प्रक्षालयति । तस्य आरोग्यार्थं सततं प्रयत्नशीला भवति । सन्ततेः दुःखे दुःखिता तत्सुखे च सुखिनी भवति । सन्तति हासयन्ती स्वयं हसति । विविधप्रकारेण सन्तति लालयन्ती मोदते । ततः क्रमेण दैनिकक्रियासु लौकिकव्यवहारे शनैः शनैः सन्तति शिक्षितां विदधाति । एवं हि मातैव प्रथमो गुरुः । अत एव वेदेऽपि 'मातृदेवो भव' इत्यादेशः उपलभ्यते ।

मनुस्मृतिकारोऽपि मातुर्महिमानं प्रतिपादयति—

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि॥
उपाध्यायाद् दशाचार्य आचार्याणां शतं पिता।
सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते॥

यथा जगति जनन्या महत्त्वं तथैव जन्मभूमेरपि महन्महत्त्वं वर्तते। वेदेऽपि "माता भूमिः पुत्रोऽहं पृथिव्याः" इति मातृभूमेर्महिमा स्वीकृतः। "मा नो माता पृथिवी दुर्मतौ धात्" इति श्रुतिवचने दुर्गतेः परित्राणार्थम् मातुः पृथिव्याः प्रार्थना क्रियते।

येन प्रकारेण माता दुग्धादिना सन्ततिं रक्षति, तथैव जन्मभूमिरपि कन्दैः मूलैः फलैः अन्नैः अस्माकं जननीव संवर्धनं करोति। जन्मभूमिरेव अस्माकं निवासः। जन्मभूम्या एव क्रीडाक्षेत्रेषु वयं क्रीडामः, मार्गेषु भ्रमामः, पर्वतान् आरोहामः, उद्यानेषु विहरामः, क्षेत्रेषु अन्नादीन्युत्पादयामः। अस्माकं सर्वप्रकाराणां गतीनां प्रगतीनां च मातृभूमिरेव आधारः।

मातृभूमौ पराधीनानां जनानां समीचीनरूपेण विकासो न भवति। सम्मानमपि सुरक्षितं न भवतीति विचिन्त्यैव स्वनामधन्यो महाराणा प्रतापो यावज्जीवनं मातृभूमेः स्वतन्त्रतायै संघर्षमकरोत्। यद्यपि तदानीमेव मानसिंहादयः पामरराजानोऽप्यभूवन्ये स्वकीय-जन्मभूमेः सम्मानम् अविगणय्य, आत्मनोऽपि स्वाभिमानं पश्चात्कृत्य, भारतीयम् इतिहासं लाञ्छितवन्तः। एवम्प्रकारा राजानो वा सामान्य-पुरुषा वा सततं निन्दनीयाः।

महाराष्ट्र-केसरी शिवाजी महाभागोऽपि जन्मभूमेर्गरिमाणं गणयित्वैव आजीवनं तस्याः स्वतन्त्रतायै प्रयत्नशीलोऽभवत्। मातृभूमेः सम्मानाय एव महाराज्ञी लक्ष्मीबाई आंग्लैः सह घोरं युद्धं कुर्वन्ती प्राणान् जहौ।

बालगङ्गाधरतिलक - मदनमोहनमालवीय - मोतीलालनेहरू- लाला लाजपतराय-मोहनदासकरमचन्दगान्धी-जवाहरलालनेहरू-सुभाषचन्द्रबोस

सरदारपटेलप्रभृतयो मातृभूमिचरणानुरागिणो जन्मभूमेः स्वतन्त्रतार्थं यावज्जीवनं प्रायतन्त ।

भगतसिंह-चन्द्रशेखरआजादप्रभृतयो बहवः क्रान्तिकारिणो जन्मभूमेः परित्राणार्थम् आंग्लशासकानां प्रशासनमूलम् उत्खनन्तो जन्मभूमेश्चरणयोः स्वकीयं बलिदानं कृतवन्तः। मातृभूमिसंरक्षणविषये केनचित् कविना सम्यगेव लिखितम्--

यस्याः क्रोडे विविधाः क्रीडाः कृताः क्रियन्ते नितराम्।
तस्या भारतभुवो रक्षणं कर्तव्यं नः सुतराम्॥

महाकवि-कालिदासग्रथिते नाटके अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के मातृभूमेः प्रेम्णो हृद्यं निदर्शनम् उपलभ्यते। पतिगृहगमनवेलायां महर्षेः कण्वस्य दुहिता शकुन्तला पितरं वक्ति--

"तात! मलयोन्मूलिता चन्दनलतेव कथं देशान्तरे जीवनं धारयिष्ये।"

अस्मिन् शकुन्तलायाः वचने कियान् सहजः स्नेहो जन्मभूमिं प्रति प्रकटितः।

सम्प्रत्यपि वर्षाणि यावद् अर्थार्जनप्रसङ्गेन विदेशेषु निवसन्तो जना अर्थार्जनं कृत्वा स्वजन्मभूमिं प्रतिनिवर्तन्ते। ये च विवशाः विदेशेषु निवसन्ति तेषामपि मनांसि स्वदेश एव रमन्ते।

पक्षिणोऽपि दिवसे आहारार्थं तत्र-तत्र भ्रमन्तो रात्रेरागमनात् प्रागेव स्वनीडेषु प्रतिनिवर्तन्ते। सिंहादयो वनजन्तवोऽपि यत्र तत्र विहृत्य, अन्तः शरण्यं स्थलं भजन्ते।

एतैरन्यैश्च बहुभिर्निदर्शनैः "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इत्ययं भगवतो रामस्योद्गारो यथार्थभूमौ कृतपदो दृश्यते।

—:o:—

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः

(नास्त्युद्यमसमो बन्धुः, साहसे श्रीर्वसति, पुरुषार्थो वा)

जगति भाग्यवादिनां पुरुषार्थवादिनाञ्च पुराणौ पक्षौ स्तः। इदानीमपि उभयपक्षीयौ विविधाभिरुक्तिभिः स्व-स्वमतं समर्थयन्तौ विद्यमानौ। रामायण-महाभारत-पुराणेषु परवर्तिनीषु रचनासु भाषा-कृतिष्वपि क्वचिद् भाग्यस्य महिमा वर्णितः, क्वचिच्च पुरुषार्थस्य, क्वचिच्चोभयोः स्व-स्वस्थाने महत्त्वं प्रतिपादितम्।

वस्तुतो भाग्यस्यास्तित्वं तु विद्यते एव परन्तु भाग्यस्य निर्माणं कर्मणैव भवति। कर्मणः परिणाम एव भाग्यम्। अतो भाग्यं कर्मफलत्वेनैव तिष्ठति। पुरुषार्थः उद्यमपदेन उद्योगपदेन च व्यपदिश्यते। भाग्यवादिनां वचांसि अपरिपक्वबुद्धीन् जनान् कर्महीनतां प्रति प्रेरयन्ति। कर्महीनतया जीवनयात्रा निरुध्यते। लोकसंग्रहदृष्ट्यापि जनेनोद्योगवता भाव्यम्। जनकादयो ब्रह्मज्ञानिनोऽपि उद्योगसंकुलं कर्ममार्गं न त्यक्तवन्तः। यथा गीतायाम्—**कर्मणैव हि संसिद्धिमास्थिता जनकादयः।**

लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥

कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरैः कृतम्।

भाग्येन प्राप्तस्य वस्तुनः उपयोगायापि उद्यमस्य आवश्यकता जागर्ति। सिंहादिभिः हिंस्रैर्जीवैः भाग्यसंयोगेन प्राप्तानाम् मृगाणाम् आखेटं विना क्षुधायाः शान्तिर्नैव कर्तुं शक्यते। यथोक्तम्—

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

पुरुषार्थं विना भाग्यं न सिध्यति—

यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।
तथा पुरुषकारेण विना दैवं न सिध्यति॥

केवलं मनुष्येष्वायं विकारो यत्तेषु केचिद् अनुद्यमिनः सन्ति। प्रकृत्यां खलु सर्वे प्राणिनः सततोद्योग-परायणाः सन्ति। गज-सिंहादि-प्रभृतयः सर्वे पृथ्वीजीवाः सततमुद्योगलग्ना दृश्यन्ते। मूषकाणामुद्योगेन कोऽपरिचितः? अतिलघुः पिपीलकः प्रातःकालादेव प्रयत्नपरो धावन् दृश्यते। अतः केनचित् सत्यमेवोक्तम्—

गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥

निर्धना अपि जनाः सततोद्योगेन समृद्धिं लभन्ते। विद्यार्थी अध्ययनोद्योगेन विद्वान् भवति। तपस्वी तपसोद्योगेन सिद्धो भवति। दुर्बलः व्यायामेन सततोद्योगेन बलवान् भवति। संसारे या समुन्नतिर्विलोक्यते सोद्यमस्यैव परिमाणः।

उद्योगपरायणाः यवनाः भृशं सोद्यमत्वाद् भारतभूमिं स्ववशेऽकुर्वन्। तदनन्तरम् आंग्लव्यापारिणः क्रमशः अत्युत्कटोद्योगेन भारतदेशे शासनं स्थापयामासुः। कालक्रमेण भारतीयो उद्योगं प्रति पुनः आस्थावन्तः जाताः। स्वतन्त्रताप्राप्तये घोरमुद्योगमङ्गीकृत्य प्रयत्नपरा अभूवन्। अतिसंघर्षानन्तरम् उद्योगमहिम्ना भारतं स्वतन्त्रमकारयन्। अधुना राष्ट्रस्य अखण्डतायै सर्वैर्भारतीयैः सोद्यमैर्भाव्यम्।

आलस्यं हि मानवानां शरीरसंस्थितः शत्रुरस्ति। उद्योगश्च हितकरो बन्धुः। यथा— **आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति॥

उद्यमपरायणानि राष्ट्राणि अनुदिनं स्वराष्ट्राणां विकासं कुर्वन्ति उद्यमेन पृथिव्याः गर्तात् तैलं प्राप्यते। स्वर्णादयः पदार्था अपि उद्यमेनैव पृथ्वीतः प्राप्ताः संस्कृताश्च।

विश्वामित्रेण उत्कटं तपः कृत्वा बहुवारं विघ्नितोऽपि उद्योगपरायणतावशात् अन्ततो ब्रह्मर्षित्वं लब्धवानेव। भगीरथेन तपस्योद्यमेनैव पुण्यसलिला देवनदी गङ्गा पृथिव्यामवतारिता।

वर्तमाने युगे उद्यमशीलाः वैज्ञानिकाः असम्भवमपि सम्भवं कुर्वन्तो

विद्यन्ते। उद्योगनैव वैज्ञानिकाः चन्द्रे चरणक्षेपं कृतवन्तः। उद्यमेनैव अन्तरिक्षे यन्त्राणि संम्प्रेष्य तद्द्वारा जगतीतलस्थानि, समुद्रगानि, अन्तरिक्षजातानि च रहस्यानि करतलामलकवत् पश्यन्ति। अहो उद्योग-महात्म्यम्! केनचित् कविना सम्यगभिहितम्—

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥

—:०:—

ऋतुराजो वसन्तः

वसन्तः ऋतूनां राजा कथ्यते। अयं सर्वेषां ऋतूनां शोभाम् अतिशेतेऽतः 'ऋतुराजः' इति वसन्तस्य अन्वर्थकं नाम। चैत्र-वैशाखौ वसन्तस्य अधिकृतौ मासौ स्तः। परन्तु इदानीं माघमासे शुक्लपक्षस्य पञ्चम्याम् एव तिथौ वसन्तोत्सवस्य आयोजनं विधीयते।

वसन्ते प्रकृतिः नवयौवनमिव आदधाति। अतएव भगवान् श्रीकृष्णो गीतायां दशमेऽध्याये स्वविभूतिवर्णने "ऋतूनां कुसुमाकरः" इति कथितवान्। अस्मिन् काले परिपक्वानि पीतवर्णानि सस्यानि जनमानसं हर्षयन्ति। वृक्षाः लताश्च मसृणैः नवपल्लवैः पुष्पसम्पत्तिभिश्च नितरां राजन्ते।

अस्मिन् ऋतौ आम्रवृक्षाणां शोभा अपूर्वा भवति। आम्रमञ्जरीणां निपतितं रजः तथा प्रतीयते यथा कामहुताशनस्य मुर्मुराख्यं चूर्णं पथिकानाम् उपरि निपतितं तान् व्यथयति। यथोक्तं माघकाव्ये—

स्मरहुताशनमुर्मुरचूर्णतां दधुरिवाम्रवणस्य रजः कणाः।
निपतिताः परितः पथिकव्रजानुपरि ते परितेपुरतो भृशम्॥

आम्रमञ्जरीणां पीतिमा, मादकं मधु, हृद्यश्च आमोदो वातावरणे मादकताम् उत्पादयन्ति, येषामाकर्षणेन भ्रमरपंक्तयो दूरदूरादापतन्ति। भ्रमराणां गुञ्जनम् अतीव कर्णमनोहरं प्रतिभाति। कोकिलाः अपि पञ्चम-स्वरेण प्रतिरसालम् आलपन्ति।

मधुकराङ्गनाः माधवीलतायाः मधु निपीय समेधितस्वराः मधुरं रवं प्रारभन्ते। यथोक्तं माघकृतौ—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥

वसन्तसमये हसन्तीमिव कुरबकराजिवधूम् अशोकपल्लवेषु संस्थितः पुष्पधन्वा विकसितकुसुमाधरो देवीभिरवलोकितः। यथोक्तं भारविकृतौ किरातार्जुनीये—

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम्।
ददृशुरिव सुराङ्गनाः निषण्णं सशरमनङ्गमशोकपल्लवेषु॥

वसन्तागमने सरोवरः अपि मनोहरां श्रियं बिभ्रति। सरोवरजलं रमणीकपङ्कजयुतं विलसति। पङ्कजानि भ्रमरयुक्तानि संजायन्ते। भ्रमराश्च सुगुञ्जनेन बहु विराजन्ते। यथोक्तं भट्टिकाव्ये—

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥

कामसखस्य वसन्तस्य आगमनम् अवलोक्य न केवलं मनुष्या एव मनसिजवशङ्गता भवन्ति, अपि तु पशुपक्षिणोऽपि कामचेष्टां प्रकटयन्ति। तथाविधम् कुमारसम्भवगतं पद्यमेकम् अवलोक्यताम्—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥

वसन्तर्तौ न तु शिशिरस्य शैत्यं भवति न च ग्रीष्मर्तोः तापः संतापयति। अस्मिन् ऋतौ समशीतोष्णः कालः प्राणिजातं सुखयति।

प्रफुल्लानां लतानां वृक्षाणाञ्च कुसुमगन्धमादाय पवनः मन्दं-मन्दं प्रवाति। दिवसाः रात्रयश्च रमणीयाः भवन्ति। अत एव ऋतुरयं सर्वेषां कृते सुखावहो भवति। कविकुलगुरुः कालिदासः वसन्तविषये भूतार्थम् उक्तवान्—

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः।
सुखाः प्रदोषाः दिवसाश्च रम्याः
सर्वं सखे चारुतरं वसन्ते॥

—:०:—

शरदृतुः

शरदृतोः प्रवर्तनं वर्षर्तोः पश्चाद् भवति। शरदो रामणीयकं कविभिः बहुधा वर्णितम्। शरदि नदी-जलाशयानां जलं निर्मलं संजायते। स्वच्छं निर्मेघञ्च गगनं बहु शोभते। सरोवरेषु पङ्कजानि विकसन्ति। कमलेषु गुञ्जन्तो भ्रमराः इतस्ततो भ्रमन्ति। दिशां मुखानि प्रसन्नानि जायन्ते। प्रमुदिताः हंसाः हंसीभिः समं सरोवरेषु नदीपुलिनेषु विचरन्ति। नदी-तटोद्भवेषु धवलवर्णेषु कासेषु विचरन्ती हंसी नरेन्द्रभवनेषु संचरन्ती प्रतिहारीव राजते। यथोक्तं महाकविभासप्रणीते प्रतिमानाटके—

चरति पुलिनेषु हंसी कासांशुकवासिनी सुसंहृष्टा।
मुदिता नरेन्द्रभवने त्वरिता प्रतिहाररक्षीव॥

शरदागमने एकतो हंसानां महोत्सवः सम्पद्यतेऽपरतो विषण्णानां मयूराणां विमुक्तबर्हाणां गतोत्सवानां मेघविहीनं गगनं दृष्ट्वा ध्यान-पराणां क्लेशो दृष्टिगोचरो भवति। यथोक्तं वाल्मीकिरामायणे—

नभः समीक्ष्याम्बुधरैः प्रमुक्तं
विमुक्तबर्हाभरणा वनेषु।
प्रियास्वरक्ता विनिवृत्तशोभा
गतोत्सवा ध्यानपरा मयूराः॥

महाकविः माघोऽपि शरदि मयूराणां दुःखस्य हंसानाञ्च हर्षस्य वर्णनं कृतवान्—

शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम् ।

शरदि रात्रिः शुक्लवसनावृता नारीव अपूर्वां शोभामादधाना विराजते। उदितः शशाङ्कः तस्याः सौम्यम् मुखं वर्तते, तारागणाः एव तस्या, चारुणी नेत्रे, ज्योत्स्नैव तस्याः अंशुकप्रावरणम्। यथा वाल्मीकि-रामायणे— **रात्रिः शशाङ्कोदितसौम्यवक्त्र**

तारागणोन्मीलितचारुनेत्रा ।

ज्योत्स्नांशुकप्रावरणा विभाति

नारीव शुक्लांशुकसंवृताङ्गी ॥

शरद् नववधूरिव विभाति। प्रफुल्लाः कासा एव तस्याः वस्त्राणि। विकसितानि पद्मानि तस्या मुखम्। सोन्मदानां हंसानां रवाः एव तस्याः नूपुरो। परिपक्वाः शालयः एव तस्याः तनुगात्रयष्टिः। यथोक्तम्—

काशांशुका विकचपद्ममनोज्ञवक्त्रा

सोन्मादहंसरवनूपुरपादरम्या ।

आपक्वशालिरुचिरा तनुगात्रयष्टिः

प्राप्ता शरन्नववधूरिव रम्यरूपा ॥

शरद्दतौ शनैः शनैः क्षीयमाणं जलं जलचराः जीवाः तथैव न विदन्ति यथा मूढाः मनुष्याः अनुदिनं क्षीयमाणम् आयुषः समयं न विचारयन्ति। यथा—

नैवाविदन् क्षीयमाणं जलं गाधजलेचराः ।

यथायुरन्वहं क्षय्यं नरा मूढाः कुटुम्बिनः ॥

आश्विन-कार्तिकौ शरदोऽधिकृतौ मासै स्तः। द्वयोरेव मासयोः द्वौ महत्त्पूर्णौ महोत्सवौ भवतः। आश्विनमासे नवरात्रपूर्वकं विजय-दशमीमहोत्सवः कार्तिकमासे च दीपावलीमहोत्सवः शरद्दतोः महिमानं भुयसा संवर्धयतः।

—:०:—

वर्षर्तुः

भारतवर्षे षण्णाम् ऋतूणां प्रवर्तनं भवति। ते च षड्ऋतवः ग्रीष्म-वर्षा-शरद्-हेमन्त-शिशिर-वसन्ताभिधानाः सन्ति। प्रत्येकस्य ऋतोः अवधिः मासद्वयं वर्तते। तत्र ज्येष्ठाषाढयोः ग्रीष्मर्तुः श्रावणे भाद्रे च वर्षर्तुः, आश्विन्-कार्तिकयोः शरदृतुः, आग्रहायणे पौषे च हेमन्तर्तुः, माघ-फाल्गुनयोः शिशिरर्तुः, चैत्रवैशाखयोः वसन्तर्तुः, इत्येतत्क्रमेण षड्ऋतवः प्रवर्तन्ते।

अयं हि ऋतूनां शास्त्रीयः पक्षः। किन्तु व्यावहारिके पक्षे हेमन्तस्य शिशिरस्य च शरदृतावेव अन्तर्भावो दृश्यते। शिशिरस्य च पश्चभागो वसन्तेऽन्तर्भूतः। वसन्तस्य च पश्चभागो ग्रीष्मर्तौ अन्तर्भूतः। ग्रीष्मस्य च पश्चभागो वर्षर्तौ अन्तर्भूतो दृश्यते। न केवलम् एतादृशो व्यवहारः इदानीन्तमे समये क्रियते, अपि तु कालिदाससमयेऽपि आषाढमासस्य समयो वर्षर्ताविव वर्णितः। अन्यथा मेघदूते—

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं।
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥

इति कालिदासः कथं कथितवान् भवेत्। वर्षर्तौ पीतवर्णाना-माम्रफलानां वर्णनम्, परिपक्वानां श्यामवर्णानां जम्बूफलानां वर्णनम् आषाढमासे एव भवति, न तु श्रावणमासे आम्रजम्बूफलानां वर्णनीया समुपलब्धिः भवति। यदि केवलं श्रावणमासो भाद्रपदमासश्च वर्षायाः अधिकृतौ मासौ भवतः, तर्हि केन प्रकारेण महाकवीनां वर्षावर्णनस्य सङ्गतिः भवेत्। श्रीमद्भागवतस्य दशमस्कन्धस्य विंशतितमेऽध्यायेऽपि वर्षर्तुप्रसङ्गे सुपक्वानां जम्बूफलानां वर्णनं विलसति।

ग्रीष्मर्तौ भगवान् भास्करो यं पृथिव्याः रसं किरणैः पिबति तं बहुगुणीकृत्य प्रावृट्काले मेघमाध्यमेन उद्गिरति। यथा रघुवंशे—

'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।'

वर्षर्तुः ग्रीष्मतप्तानां जीवानां कृते रसायनवद् वर्तते। स्थावरजङ्गम-संसारस्य कृते वर्षर्तुः जीवनदायकः। श्रीमद्भागवते समीचीनमेवोक्तम्—

'ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा।'

यदैव ग्रीष्मस्यानन्तरं वर्षर्तुः प्रवर्तते तदा संसारस्य कलेवरम् अन्यादृशं संजायते। आम्रफलानि रसवन्ति भवन्ति जम्बूफलानि च सुफुल्लानि राजन्ते। कदम्बतरवः वर्षायाः प्रथमैरेव विन्दुभिः पुष्प्यन्ति। वसुधा हरीतिम्ना संयुक्ता भवति। क्षुद्रा नद्यः तथैव उत्पथ-वाहिन्यो भवन्ति यथा स्वतन्त्रस्य (कामचारस्य) पुरुषस्य देहद्रविण-सम्पदो भवन्ति। यथोक्तं श्रीमद्भागवते—

आसन्नुत्पथवाहिन्यः शुष्कनद्योऽनुशुष्यतीः।
पुंसो यथा स्वतन्त्रस्य देहद्रविणसम्पदः॥

जनस्य कृते परमात्मा तिरोहितो भवति—

न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः।
अहम्मत्या भासितया स्वभासा पुरुषो यथा॥

आदिकवेः वाल्मीकेरपि मानसं वर्षा आकृष्टवती। अतः स वर्षर्तुं वर्णयामास –

वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गमाः॥

अर्थाद् वर्षर्तौ नद्यः प्रवहन्ति। घनाः वर्षन्ति। मत्तगजाः नदन्ति। वनान्ताः भान्ति। प्रियाविहीनाः ध्यायन्ति। शिखिनो नृत्यन्ति। प्लवङ्गमाः समाश्वसन्ति।

प्रावृषि वनेषु गजराजाः मदमत्ताः संजायन्ते। गवेन्द्राः प्रमुदिताः भवन्ति। सिंहाः विक्रान्ततराः भवन्ति। पर्वताः रमणीकां श्रियं विभ्रन्ति। राजानो निरुद्योगाः जायन्ते। देवराजोऽम्बुदैः सह क्रीडति यथोक्तं रामायणे—

मत्ता गजेन्द्रा मुदिता गवेन्द्राः
वनेषु विक्रान्ततरा मृगेन्द्राः।

रम्या नगेन्द्रा निभृता नरेद्रा
प्रक्रीडितो वारिचरैः सुरेन्द्रः ॥

मेघेषु प्रवर्षणप्रवृत्तेषु तथानुभूयते यथा वज्रतापतप्तं गगनं द्रवीभूतं जलरूपेण पृथिव्यां निपतितम् यथोक्तं शूद्रककृतौ मृच्छकटिके—

गता नाशं तारा उपकृतमसाधाविव जने
वियुक्ता कान्तेन स्त्रिय इव न राजन्ति ककुभः ।
प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना
द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥

—:०:—

विजया दशमी

विजया-दशमी-महोत्सवः आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ सम्पन्नो भवति । दशम्यां तिथौ विजयाभिधानो मुहूर्तो भवति यस्मिन् विजय-यात्रा-प्रभृतीनि सर्वाणि कार्याणि प्रशस्तानि भवन्ति । प्राचीन-कालेऽस्मिन् दिवसे राजानः आयुधपूजन कृत्वा सीमातिक्रमणं कुर्वन्ति स्म । अधुनापि सेनायां दिवसेऽस्मिन् आयुधपूजनं महता समारोहेण सम्पाद्यते । अन्येऽपि आस्थासमायुक्ताः जनाः अस्मिन्नवसरे स्वीयायुध-पूजनं कुर्वन्ति ।

आयुधपूजाप्रधानत्वात् केचिद् इमम् महोत्सवं क्षत्रियाणामुत्सवं समर्थयन्ति । एवमेव रक्षाबन्धनं ब्राह्मणानां, दीपावली वणिजां, तथा च होलिकोत्सवः शूद्राणामिति बहूनां विदुषां मतम् । परन्तु इयं मान्यता प्रायिकी एव, यतो हि प्राचीनकाले न केवलं क्षत्रियाः एव अस्मिन् दिवसे विजययात्रां कुर्वन्ति स्म, अपि तु व्यवसायिनः प्रवासिनोऽपि अवसरे-ऽस्मिन् यात्रामुहूर्तमकुर्वन् कुर्वन्ति चेदानीम् ।

नवरात्रेषु श्रीदुर्गादिदेवीनाम् आराधनां कृत्वा विजयदशम्यां तत्प्र-

तिमाः विसृज्यन्ते। दुर्गादिदेवीनां पूजनं देशे देशान्तरे च क्रियते, किन्तु बङ्गभूमौ अस्य विशिष्टं महत्त्वं वर्तते। भगवान् रामोऽपि रावण-पराजयाय महाशक्तेराराधनं कृतवानिति प्रसिद्धम्।

पुरा मर्यादापुरुषोत्तमः श्रीरामः सीतायाः अपहरणे जाते, प्रवर्षण-पर्वतेऽभियानावरोधकारिणीं वर्षां व्यतीत्य, विजयदशम्यामेव रावणस्योपरि विजयाय वानराणां भल्लूकानाञ्च महता सैन्येन सह लक्ष्मणानुगतः प्रस्थानं कृतवान्। अस्मिन्नवसरे ग्रामे ग्रामे नगरे नगरे श्रीरामलीलायाः भव्यानि आयोजनानि आयोज्यन्ते। रामलीलायाः प्रारम्भः क्वचित् नवरात्रे क्वचिच्च पितृपक्षे क्रियते। विजयदशम्याम् आतङ्कप्रतीकस्य त्रैलोक्यकण्टकस्य रावणस्य विशालः पुत्तलो दाह्यते। अस्मिन्नवसरे रामलीलायाः माध्यमेन जनतायां रामस्य भव्यं जीवन-चरित्रम् आदर्शजीवनस्य स्थापनाय प्रदर्श्यते। रामो दैवीनां शक्तीनां प्रतीको विद्यते, रावणश्च आसुरीणां प्रवृत्तीनां प्रतीकः। विजयदशम्यां रावणस्योपरि रामस्य विजयेन आसुरीणां प्रवृत्तीनामुपरि दैवीनां शक्तीनां विजयः प्रख्यायते।

अयं महोत्सवः शैवानां शाक्तानां वैष्णवानां च सम्प्रदायेषु समान-रूपेण महत्त्वपूर्णं वर्तते। शारदीयनवरात्रस्य अन्तेऽयमुत्सवः प्राकृतिकं सौष्ठवम् आदधाति। अस्मिन् समये नदीनां जलं स्वच्छं सञ्जायते। सरोवराणि प्रफुल्लपद्मानि राजन्ते। दिशः प्रसन्नाः अवलोक्यन्ते। गगनं स्वच्छं विराजते। मार्गाः विगतकर्दमाः विलसन्ति। समशीतोष्णाः वाताः प्रवान्ति। परिपाकोन्मुखाः शालयः क्षेत्रेषु सुशोभन्ते। खग-कुलं रुचिरं निकूजति। किं बहुना, विजया-दशमी-महोत्सवस्य सम-शीतोष्णः कालोऽस्य महोत्सवस्य महिमानं द्विगुणयति।

—: ० :—

होलिकोत्सवः

होलिकोत्सवः फाल्गुनमासस्य शुक्लपक्षस्य पूर्णिमायां रात्रौ होलिकादाहमारभ्य प्रारभते। ततः परेऽहनि प्रतिपदि होलिकाभस्मवन्दनपुरःसरं जनाः परस्परं मिलन्ति। अस्मिन्नवसरे रङ्गाणां कुङ्कुमस्य (अबीरगुलालस्य) परस्परम् आक्षेपणं भवति। फाल्गुनगीतानि गायन्तो, वाद्यानि वादयन्तो जनाः द्वारं द्वारं गच्छन्ति। यस्य यस्य द्वारि समाजो गच्छति तस्य तस्य गृहस्य स्वामी स्वपरिवारसदस्यैः सार्धं होलिकोत्सवसमाजाय मिष्टान्न-ताम्बूलादीनि प्रदाय जनान् सभाजयति। एवम्प्रकारेण अस्मिन्नुत्सवे सर्वे जनाः नीचोच्चभावनां पृष्ठे कृत्वा सौहार्देन परस्परं मिलन्ति। अस्मिन्नुत्सवे नारीणामुत्साहो दर्शनीयो भवति। बालकानामुत्साहस्तु सर्वेषु पर्वसु सर्वोपरि विराजते एव। व्रजभूमेः होलिकोत्सवः विश्वविश्रुतोऽस्ति। अयमुत्सवः सामाजिकदृष्ट्या सर्वानुत्सवान् अतिशेते।

होलिकोत्सवस्य प्रधानतया द्वे अङ्गे स्तः। होलिकादाहः, होलिकोत्सवश्च। होलिकादाहस्य विषये पौराणिकी गाथा वर्तते। यथा हि दैत्यराजस्य हिरण्यकशिपोः पुत्रः प्रह्लादो विष्णोः भक्तिं करोति स्म। दैत्यराजो विष्णवे द्रुह्यति स्म। अतः स स्वपुत्रं 'विष्णुभक्तिं मा कुरु' इति न्यषेधत्। परन्तु प्रह्लादः पितुराज्ञां तिरस्कृत्य विष्णोः भक्तिं न तत्याज। एतेन क्रुद्धो हिरण्यकशिपुः प्रह्लादं विषादिना हन्तुं प्रायतत। भक्तराजः प्रह्लादः निर्भीकः विष्णुभक्तिं कृतवानेव। तदानीं होलिकानाम्नी हिरण्यकशिपोः स्वसा दैत्यराज समाश्वासितवती यदहं प्रह्लादम् अङ्के कृत्वा चिताम् आरोहयिष्यामि। अहञ्च स्वकीयस्य उत्तरीयस्य प्रभावेण न ज्वलिष्यामि। प्रह्लादस्तु भस्मसात् भविष्यति। किन्तु तथा कृते सति प्रह्लादः भगवता विष्णुना रक्षितः। राक्षसी तु सा दग्धा संजाता। इयं घटना फाल्गुनमासस्य पूर्णिमायां घटिता बभूव, अतः एतस्मिन्नवसरे होलिकादाहो विधीयते।

होलिकादाहः खलु आसुरीशक्तीनामुपरि देवशक्तेः विजयं स्मारयति :

"हिंस्रः स्वपापेन विहिंसितः खलः
साधुः समत्वेन भयाद् विमुच्यते ।"

इति भागवतोक्तेरनुसार सज्जनः सत्कर्मनिरतत्वाद् बन्धनविमुक्तो भवति। हिंसकः खलः स्वैः पापैरेव विलयं प्राप्नोति। इमं सिद्धान्तं प्रतिवर्षं स्मारयति होलिकादाहः। केचिद् होलायाः अन्नविशेषस्य अग्नौ प्रक्षेपणाद् इममुत्सवं होलिकोत्सवं मन्यन्ते ।

होलिकोत्सवः प्राचीनं वसन्तोत्सवम् अपि स्मारयति। संस्कृत-साहित्यस्य ग्रन्थानां परिशीलनेन इदं ज्ञायते यत्प्राचीनकाले देशस्य सर्वेषु सम्भागेषु वसन्तोत्सवो महता समारोहेण मान्यते स्म। उत्सवेऽस्मिन् राजानो राजपुरुषाः ग्रामवासिनो नगरनिवासिनश्च सर्वे समवेताः सन्तः वसन्तोत्सवं मानयन्ति स्म। स एव इदानीन्तनः होलिकोत्सवः।

दीपावली-प्रभृतयः उत्सवाः स्वगृहमात्रसंक्षिप्ताः सन्ति, परन्तु होलिकोत्सवस्य क्षेत्रं विस्तृतं वर्तते। अस्मिन् महोत्सवे जनाः अपराह्णे स्नात्वा सुवेषधारिणः शिष्टाचाराङ्गत्वेन अन्योन्यस्य गृहं मिलितुं प्रयान्ति। एतेन मिलनसमारोह-माध्यमेन वर्षाभ्यन्तरे समुत्पन्नानां कलहानां प्रायः शमनं सजायते। इयम् अस्योत्सवस्य महती समुपलब्धिः।

—:०:—

दीपावली

दीपावलीमहोत्सवः पञ्चदिवसात्मको भवति। अयमुत्सवः त्रयोदशी-मारभ्य यमद्वितीयापर्यन्तं चलति। पुरा यदा देवासुराः परस्परं सम्मिल्य सागरमन्थनं चक्रुस्तदा कार्तिकमासस्य कृष्णपक्षस्य त्रयोदश्या-मेव विष्णोः कलावतारो भगवान् धन्वन्तरिः हस्तेन अमृत-कलशं दधानः आविर्भूतः। अतोऽस्मिन् दिवसे धन्वन्तरिपूजनं क्रियते। इदानी

लोके धन्वन्तरि-त्रयोदशी-महोत्सवः "धनतेरस" इति नाम्ना प्रसिद्धोऽस्ति। दिवसेऽस्मिन् जनाः नवीनानां पात्राणां क्रयणं माङ्गलिकं मन्यन्ते। अतः त्रयोदश्यां जनाः यथाविभवं पात्राणि अवश्यमेव क्रीणन्ति।

अतः परं चतुर्दश्यां सागरमन्थने प्रवृत्ते कामधेनुः प्रादुरासीत्। अयं दिवसो नरकचतुर्दशीति नाम्नाप्यभिधीयते। अस्मिन्नेव दिवसे भगवान् श्रीकृष्णो नरकनामानम् असुरं मर्दयामास। भगवतः शिवस्यावतारो हनूमानपि चतुर्दश्यामेव प्रादुर्भूतः। अतोऽयमवसरो हनुमज्जयन्तीरूपेणापि मान्यते। अयं दिवसः "छोटी दिवाली" इति नाम्ना लोके प्रसिद्धः।

अतः परम् अमावास्यायां सकल-धनधान्यानाम् अधिष्ठातृदेव्याः, भगवतो विष्णोः अर्धाङ्गिन्याः, भगवत्याः लक्ष्म्याः पूजनं क्रियते। अमावास्यायामेव भगवती लक्ष्मीः सागरमन्थनात् प्रादुर्भूता। प्रदोषकाले विघ्नविनायकस्य गणेशस्य पूजनपूर्वकं देव्याः लक्ष्म्याः पूजनं यथाविभवं विधीयते जनैः। देव्याः लक्ष्म्याः सम्मानाय जनाः स्वगृहाणि सम्यक् स्वच्छीकुर्वन्ति। सुधया गृहाणि लिम्पन्ति लेपयन्ति च। शर्कराक्रीडनकानि लाजाः अन्यानि च विविधानि मिष्ठान्नानि देव्यै निवेद्यन्ते। ततः परं प्रसादरूपेण सर्वाणि मिष्टान्नान्युपयुज्यन्ते जनैः। एतस्मिन्नवसरे बालकानां प्रमोदो द्रष्टव्यो भवति। गृहेषु द्वारेषु सर्वत्रैव जनाः दीपकान् वर्तिकाश्च प्रज्वाल्य लक्ष्म्याः सभाजनं कुर्वन्ति। दीपमालिका-प्रारम्भविषये कथ्यते यद् भगवान् रामः कार्तिक-कृष्णपक्षस्य अमावास्यायामेव चतुर्दशवर्षस्य वनवासस्यावधिं परिसमाप्य सीतालक्ष्मणाभ्यां सुग्रीवविभीषणादिभिः मित्रैश्च सार्धम् अयोध्यां प्रत्यागतवान्। तदानीम् अयोध्यावासिनो जनाः रामागमनप्रसन्नतायां स्वगृहाणि भूषयामासुः, रात्रौ च दीपमालिकाः प्रज्वाल्य स्वानन्दं प्रकटयामासुः। ततः प्रभृत्ययं दीपमालिकोत्सवः प्राप्तप्रचारो बभूव।

अयं दीपावलीमहोत्सवः बहुधा सुशोभते। अस्मै देवा अपि स्पृहयन्ति । यथा—

दीपप्रभाभासितसर्वलोको दर्शोऽपि राकातुलनां बिभर्ति ।
यदुत्सवे मोदयुताः समस्ताः सा दीपमाला द्युसदामलभ्या ॥

दीपावल्याः परे दिवसे प्रतिपदि गोवर्धनपूजा भवति। गोवर्धनपूजायां गोवंशस्य पूजनं गोवर्धनपर्वतस्य सभाजनं च विधीयते। पुरा किल अस्मिन् दिवसे सप्तवर्षीयो बालकृष्णः इन्द्रकृतप्रलयसन्निभवृष्टेः गोवर्धनगिरिम् उद्धृत्य, गो-गोपवंशस्य रक्षां कृतवान् गोवर्धनगिरेश्च पूजाक्रमं प्रारब्धवान्। अस्यां तिथौ अन्नकूटस्यापि आयोजनं भवति। अन्नकूटे विविधानि भोजनानि निर्माय भगवते निवेद्यन्ते। प्रतिपदि तिथावेव सायं बलेः समर्चनं क्रियते तज्ज्ञैः श्रद्धालुभिः।

ततः पश्चाद् यमद्वितीयायां भगिन्यो भ्रातृणां मस्तकेषु रोचनेन तिलकं कृत्वा मिष्ठान्नं खादयन्ति। भ्रातरश्च भगिनीभ्यो यथाविभवं रूप्यकाणि वस्त्राणि च दत्त्वा सम्मानयन्ति। अस्मिन् दिने भ्रातृभिः भगिनीगृहे भोजनं कर्तव्यम्। श्रूयते यत् पुरा यमराजः स्वभगिन्याः यमुनायाः गृहं गत्वा भोजनं कृतवान्। ततः प्रभृति अयम् उत्सवो यमद्वितीयेति नाम्ना प्राचलत्।

एवं प्रकारेण पञ्चदिवसात्मको दीपावली-महोत्सवः महता उत्साहेन सम्पन्नो भवति। अयमुत्सवः "तमसो मा ज्योतिर्गमय" इति वेदवचसः प्रायोगिकं रूपमस्ति। दीपान् प्रज्वाल्य देवता-समर्चनद्वारा 'धनस्य सत्सु कर्मसु विनियोगं कुर्याम' इत्यभिप्रायः प्रकटीक्रियते।

—:०:—

चलचित्रम्

चलचित्रं हि विज्ञानस्य महत्त्वपूर्णः आविष्कारः। अस्य आविष्कारः अमेरिकाराष्ट्रे एडसिस-महोदयेन १८८९ इसवीयेऽब्दे कृतः। अस्माकं देशे १९१२ इसवीये सर्वप्रथमं मूकचलचित्रस्य प्रदर्शनं जातम्। ततः परम् अमेरिका राष्ट्रस्य वैज्ञानिकाः ध्वनियुक्तस्य चलचित्रस्य प्रवर्तनं कृतवन्तः। भारतवर्षे १९२३ इसवीयवर्षे ध्वनियुक्तस्य चलचित्रस्य प्रदर्शनमभवत्।

चलचित्रं नाट्यवेदस्याङ्गभूतम् अस्ति। सृष्टिगतानां सर्वेषां प्राणिनां कृते शिक्षार्थं मनोरञ्जनार्थं च नाट्यस्य निर्माणाय नाट्यस्य सृष्टिर्जाता। अस्य च नाटयस्य प्रयोजनमपि नाटयशास्त्रे समुदघोषयद् भरतमुनिः। यथा—

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रामजननं लोके नाट्यमेतद् भविष्यति॥

यानि च नाटयस्य प्रयोजनानि सन्ति तान्येव चलचित्रस्यापि विद्यन्ते। चलचित्रं खलु नाट्यस्य विकसिततरं रूपमस्ति। चलचित्रे समुत्तुङ्गानां पर्वतानां, प्रवहन्तीनां नदीनाम्, उत्तुङ्गतरङ्गाणां समुद्राणां, गर्जतां धारासारं वर्षतां सविद्युतां मेघानां, हरितवर्णानां वनराजीनां, कूजतां पक्षिणां दृश्यानि सम्मुखागतानीव साक्षात् क्रियन्ते। प्रेमालापाः, युद्धालापाः, नर्तनानि, कूर्दनानि, धावनानि, क्रीडनानि सर्वाणि प्रत्यक्षगतानि विलोक्यन्ते। ऐतिहासिकानि स्थलानि तथा च यद् वस्तु यादृग् यत्र च वर्तते, तत्तथैव तत्र विलोक्यते चलचित्रमहिम्ना। चलचित्रद्वारा जनस्य स्वस्थं मनोरञ्जनं भवति। चलचित्रगतानां वर्णानां व्याख्यां कुर्वता केनचित् शोभनं प्रतिपादितम्। यथा—

चित्तं हि चयते यत्र लीयते विचिनोति च।
त्रायते यन्महात्रासात् चलचित्रं प्रकीर्तितम्॥

बहुषु विकसितेषु देशेषु चलचित्र-माध्यमेन विद्यार्थिनां कक्षासु अध्यापनं विधीयते। अस्माकं देशेऽपि क्वचित् क्वचिदियं पद्धतिः अङ्गीक्रियते। प्रौढशिक्षायाः अपि चलचित्रम् उत्तमो माध्यमो भवितुमर्हति। चलचित्रद्वारा नैतिकशिक्षायाः प्रसारः, राष्ट्रियभावनाया विस्तारः, सत्यास्तेयादीनां सत्कर्मणां प्रचारोऽतिसौकर्येण कर्तुं शक्यते।

परन्तु यथा मानवजीवनाय विविध-सुविधाप्रदायकं विज्ञानम् अण्वायुधानाम् प्रतिस्पर्धावशाज्जीवनं प्राणसंशयनिमग्नम् अकरोत्, तथैव चलचित्राणामपि अनुचितप्रयोगेण अविकसितमस्तिष्काः बालकाः मार्गभ्रान्ताः विधीयन्ते। इदानीम् अश्लीलानां नग्नप्रायाणां चलचित्राणां प्रवर्तनेन समाजे नैतिकतायाः महान् ह्रासो जातः।

चलचित्राणाम् अश्लीलानि अशोभनीयानि गीतानि गायन्तो बालका युवकाः निर्लज्जतायाः प्रदर्शनं समाजे कुर्वन्ति। सर्वकारेण (प्रशासनेन) अश्लीलानां चलचित्राणां निर्मातारो दण्डनीयाः।

चलचित्रस्य समुचितप्रयोगेण राष्ट्रं प्रगति-मार्गं प्रति नेतव्यम्। परन्तु अस्मिन्नुद्योगे केचित् कुत्सितरुचयो निर्मातारः अधिकधनप्राप्त्यर्थं राष्ट्रिय सदाचारस्य उन्मूलने बद्धपरिकराः सन्ति। चलचित्रनिर्माणकर्तृभि साहित्यस्य, सङ्गीतस्य, नाट्यस्य च उद्देश्यं न विस्मर्तव्यम्। एतेषा प्रयोजनं 'सत्यं शिवं सुन्दरं' चैव भवेत्।

—:०:—

परिवारनियोजनम्

प्राचीनकाले यदा विश्वस्य जनसंख्या न्यूना आसीत् तदा परिवार संवर्धनम् महत्त्वपूर्णमभवत्। इदानीं तु सृष्टेराधिक्यात् परिवारस संख्यायाः नियोजनस्य आवश्यकता वर्तते। सम्प्रति यथा संसारे विश्व शान्तेः अतीव आवश्यकता विद्यते तथैव परिवारनियोजनमपि अत्यधि महत्त्वपूर्णमस्ति।

अस्मिन् महर्घतायाः समये सन्ततीनां बाहुल्यं कथमपि प्रशस्तं नास्ति। यतो हि संसाधनानाम् अल्पत्वाद् बह्वीनां सन्ततीनां सम्यक् परिपालनं सुकरं नास्ति। यदि सन्ततीनां सम्यग् विकासो न जायते तर्हि ता यावज्जीवनं क्लेशाय एव भवन्ति। प्राचीनानामप्ययम् अनुभवोऽस्ति यत् कोऽपि मनुष्यः सन्ततिबाहुल्येन धन्यो न भवति, अपितु एकयापि सुयोग्यया सन्तत्या तस्य जीवनं कृतार्थं भवति। यथोक्तम्—

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।
एकश्चन्द्रस्तमो हन्ति न च तारा सहस्रशः॥

परिवारनियोजनम् अस्माकं देशस्य कृते भृशम् आवश्यकम्। भारतवर्षे जनसंख्यायाः वृद्धिवशात् बह्व्यो नवीनाः समस्याः प्रादुर्भूताः। यथा सर्वेषां कृते पोषकाहारस्य, चिकित्सायाः, आवासस्य, शिक्षायाः, वृत्तेश्च। एतासु समस्यासु प्रमुखा समस्या वृत्तेरस्ति। यतो हि सर्वे शिक्षिताः युवकाः श्रमाद् बिभ्यति।

इदानीं विषम-समस्यानां मूले जनसंख्यायाः वृद्धिः एव तिष्ठति। अतः जनसंख्यायाः नियन्त्रणाय परिवारनियोजनम् एव परमोपायो वर्तते। परिवारनियोजनेनैव सर्वासां समस्यानां समाधानं भवितुम् अर्हति।

परिवारनियोजनस्य सर्वोत्तमः शास्त्रीयः उपायो ब्रह्मचर्यपरिपालनं वर्तते। परन्तु वर्तमानधारायां प्रवहतां जनानां कृते नास्त्ययं सरलोपायः। अतएव गर्भनिरोधकानां बह्वीनाम् ओषधीनां निर्माणं कृतं विद्यते। ओषधीनाम् अतिरिक्तं लूप-कण्डोम—इत्याख्याभ्याम् उपायाभ्यां गर्भनिरोधो विधीयते। लूपो गर्भाशयमुखगतः सन् गर्भस्थितिं निरुणद्धि। 'निरोध' इति नामकेन पुरुषजननेन्द्रियकवचेनापि गर्भस्थितिः निवार्यते शल्यक्रियया पुरुषाणां गर्भस्थापक-कृमि(शुक्र)वाहकं स्नायुं निबध्यापि गर्भस्थितिः निवार्यते। शल्यचिकित्साद्वारा स्त्रीणां गर्भाशयं निरुद्ध्यापि गर्भस्थितिः निवार्यते।

एतैः उपरिवर्णितैः प्रकारैः परिवारनियोजनस्य कार्यक्रमः सफली-

क्रियते। एतेषु उपायेषु यस्मै यस्यै वा यः उपायो रोचते, तेन तया वा स उपायः पारस्परिकसम्मतया अङ्गीकरणीयः। परिवारनियोजनं सम्प्रति राष्ट्रियं कर्तव्यं वर्तते। अतः सर्वविधं सर्वैरिदं स्वीकरणीयम्।

—:०:—

अस्माकम् महाविद्यालयः

अस्माकं महाविद्यालयस्य नामधेयं का० सु० साकेतस्नातकोत्तर-महाविद्यालयोऽस्ति। अयं महाविद्यालयः पावनसलिलायाः सरयूनद्याः नातिदूरे अयोध्यानगर्याः पश्चिमे भागे विराजते। अस्य स्थापना.... ईसवीयवर्षेऽभवत्। अस्मिन् महाविद्यालये शताधिकाः प्राध्यापकाः अध्यापनाय नियुक्ताः सन्ति। अत्रत्यम् अनुशासनम् अनुकरणीयं विद्यते। अत्र प्रातः षट्वादनादारभ्य सायं पञ्चवादनपर्यन्तं विविधविषयाणाम् अध्ययनाध्यापन यज्ञः सम्पाद्यते। अस्माकं महाविद्यालये अनुसन्धान-कार्यमपि प्रगतौ वर्तते। प्रतिवर्षम् अनेके शोधच्छात्राः 'पी-एच० डी०' उपाधि लभन्ते।

अस्माकं महाविद्यालयस्य पश्चभागे सुविशालं क्रीडाक्षेत्रम् अप्यस्ति यत्र छात्राणां स्वास्थ्यविकासाय विविधानां क्रीडानाम् आयोजनं क्रियते। अस्माकं महाविद्यालयस्य क्रिकेटक्रीडा अनेकशः लब्धपुरस्कारा वर्तते। महाविद्यालये एन० सी० सी० प्रशिक्षणस्यापि सुव्यवस्थास्ति।........सिंहमहोदयः 'सेकेण्ड लेफ्टीनेण्ट' इति पदभाग् अस्य अधिकारी अस्ति। एन० सी० सी० प्रशिक्षार्थिनां लक्ष्यसंन्धानाय क्रीडाक्षेत्रस्यैकभागे अतिस्थूलम् उत्तुङ्गं च कुड्यं विलसति।

अस्माकं महाविद्यालयस्य मध्यभागे सुविस्तृतः पुस्तकालयः समुल्लसति यत्र विविधानां विषयाणां पुस्तकानि सञ्चितानि सन्ति। पुस्तकालयस्य मध्ये एको विशालः कक्षोऽस्ति यत्र छात्राः पुस्तकानि

समाचारपत्राणि पत्रिकाश्च पठन्ति। महाविद्यालयस्य समक्षं सुविस्तृतं उद्यानम् अस्ति यत्र हरितवर्णः घासः, विविधवर्णानि च पुष्पाणि प्रफुल्लानि विराजन्ते। महाविद्यालये वाहनानां कृते पृथक् सुव्यवस्था अस्ति।

अस्माकं महाविद्यालये विद्योत्कर्षाय समये-समये वादविवादप्रतियोगिताः, सांस्कृतिककार्यक्रमाश्च आयोज्यन्ते येषु छात्राः विषयविश्लेषणं शिक्षन्ते, नाटकादीन् अभिनयान् अभिनयन्ति, सङ्गीतकानि च प्रस्तुवन्ति। अनुवर्षं विधि-विभाग-द्वारा एको रोचकः न्यायाधिकरण (Court) कार्यक्रमः प्रस्तूयते यस्मिन् न्यायाधीशस्य पुरतः वादिनः, प्रतिवादिनः, साक्षिणः, अधिवक्तारश्च स्वं स्वं विचारं तर्कं च प्रकटयन्ति। अस्य कार्यक्रमस्य मुख्यम् आकर्षणम् वादि-प्रतिवादिनोः पक्षधराणाम् अधिवक्तृणां तर्काः भवन्ति यत्र वाक्क्रीडायाः मनोहारि स्वरूपं दरीदृश्यते।

एवं हि अस्माकं महाविद्यालये निर्धारितस्य पाठ्यक्रमस्य अध्यापनेन सार्धं छात्राणां बुद्धिविकासाय सत्रपर्यन्तं विविधानि आयोजनानि आयोज्यन्ते। अत एव अस्माकं महाविद्यालयोऽस्मभ्यं बहु रोचते।

अस्य महाविद्यालयस्य आदर्शवाक्यमस्ति 'प्रियं सर्वस्य पश्यत।' सर्वे छात्राः, प्राध्यापकाः कर्मचारिणश्च तदर्थं यतन्ते।

--:o:--

छात्रजीवनम्

छात्रजीवनं मानवजीवनेऽतिशय–महत्त्वपूर्णमस्ति। एतत् खलु मानवप्रासादस्य आधारभित्तिरस्ति। छात्रजीवनं हि मानव-दिवसस्य प्रभातकालः वर्तते। प्राचीनसमये व्यक्तित्वस्य विकासाय ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाभिधानाः चत्वारः आश्रमाः परिकल्पिताः अभूवन्। तेषु प्रथमो ब्रह्मचर्याश्रमः एव 'छात्रजीवनम्' इत्युच्यते।

छात्रजीवने यादृशान् संस्कारान् विद्यार्थी आत्मसात् करोति तादृशमेव तस्य परवर्ति जीवनं संजायते। छात्रजीवनं खलु शिक्षणस्य कालः। अस्मिन् समये छात्रेण ब्रह्मचर्य-परिपालन-पूर्वकं विद्याध्ययने दत्तावधानेन भाव्यम्, यतो हि यः प्रथमाश्रमे (छात्रजीवने) अध्ययनं न करोति, द्वितीयाश्रमे (गृहस्थाश्रमे) धनार्जनं न करोति, तृतीयाश्रमे (वानप्रस्थाश्रमे) तपो न तपति, स खलु चतुर्थाश्रमे (संन्यासाश्रमे) किं कर्तुं पारयिष्यति। उक्तञ्च—

प्रथमे वयसि नाधीतं द्वितीये नार्जितं धनम्।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति॥

छात्रजीवने छात्रः सांसारिकसुखपराङ्मुखः सन् अध्ययनस्योपरि एव ध्यानं दद्यात्। सुखार्थी छात्रो विद्याध्ययनं समीचीनतया कर्तुं न शक्नोति। अत उक्तम्—

सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।
सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम्॥

छात्रजीवनं सफलं कर्तुं छात्रैः गुरुजनानाम् आदेशानाम् परिपालनम् अत्यावश्यकं वर्तते। विनम्राय जिज्ञासुवृत्तये छात्राय एव गुरुजनाः सरहस्यं ज्ञानं प्रयच्छन्ति। निगदितं च श्रीमद्भागवते—

ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत।

छात्रेण समयस्य अपव्ययो नैव करणीयः। यश्छात्रः एकैकस्य क्षणस्य सदुपयोगं करोति, स एव विद्यार्थी स्वकीयं जीवनं सफलं विदधाति। यथा अर्थार्थिना अर्थस्य कणशः संग्रहः क्रियते तथैव छात्रेण प्रत्येकस्य अध्ययनाय सदुपयोगः कर्तव्यः। कथितञ्च—

क्षणशः कणशश्चैव विद्यामर्थञ्च चिन्तयेत्।
क्षणत्यागात् कुतो विद्या कणत्यागात् कुतो धनम्॥

छात्रः पञ्चलक्षणो निगदितः। छात्रस्य चेष्टा काकवद् भवेत्। ध्यानं बकवत् स्यात्। निद्रा सारमेयवत् स्यात्। आहारः स्वल्पो भवेत्। गृहत्यागश्च छात्रस्य व्यक्तित्वविकासाय अत्यावश्यको विद्यते। यथोक्तं केनचिद् विदुषा—

काकचेष्टो वकध्यानी श्वनिद्रो हि तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः॥

छात्रेण स्वजीवनस्य साफल्याय अध्ययनेन साकं स्वास्थ्यस्योपरि दत्तावधानेन भवनीयम्। 'स्वस्थे शरीरे एव स्वस्थं मस्तिष्कं विलसति इति सूक्तेः अनुसारं जीवने स्वास्थ्यस्य महत्त्वं न्यूनं नास्ति। महाभारते यक्षयुधिष्ठिरसंवादे यदा यक्षो युधिष्ठिरं पृच्छति—जीवने को लाभः? तदा युधिष्ठिरः प्रतिवक्ति—

आरोग्यं परमो लाभः॥

छात्रावस्थायामेव छात्रेण स्वजीवने राष्ट्रसेवाभावनायाः विचारोऽपि हृदयङ्गमनीयः। छात्रजीवने छात्रो यादृशीं जीवनपद्धतिं वृणुते तादृशमेव समग्रं जीवनं सुस्थिरं भवति। यथा अपरिपक्वे मृत्तिकाभाजने कृतं चित्रकर्म परिपक्वे सति स्थिरं भवति, ततः परं यावन्मृत्तिकाभाजनं तिष्ठति तावत् तच्चित्रकर्मापि तिष्ठति, तथैव छात्रजीवने गृहीताः संस्काराः एव यावज्जीवनं विकसन्ति। अतः प्रत्येकः छात्रः छात्रजीवनं सफलयितुं प्रयत्नवान् भवेत्।

—:o:—

व्यायामः
अथवा
शरीरमाद्यं खलु धर्मसाधनम्

प्राचीनकालतः एव व्यायामस्य महत्त्वमनुभूतम्। वैदिकयुगे 'अश्मा भवतु नस्तनूः' इति शरीरस्य बलवत्तायै प्रार्थितम्। 'नायमात्मा बल-हीनेन लभ्यः' इदमुपनिषद्वचनं बलवृद्धये प्रेरयति। धर्मार्थकाममोक्षाणां सफलतायै सुपुष्टस्य शरीरस्य आवश्यकता वर्तते। 'शरीरमाद्यं खलु धर्मसाधनम्' इति कालिदासीया सूक्तिरपीदमेव समर्थयति। शरीरस्य सुपुष्टतायै पोषकाहारस्य व्यायामस्य च समानरूपेणावश्यकता भवति।

व्यायामेन शरीरं नीरोगं भवति, रक्तसञ्चारश्च सुष्ठुप्रकारेण सञ्जायते। व्यायामेन रक्तस्य शुद्धिरपि भवति। शरीरस्य मांसपेश्यः सुघटिताः भवन्ति। वपुषः ओजः संवर्धते। शरीरं स्फूर्तियुक्तं भवति। मेदसः आधिक्यं निरुध्यते। वक्षः कपाटवत् सुविस्तृतं भवति। बाहू करिकरोपमौ भवतः। वपुषो मध्यभागः तनिमानं व्रजति। जङ्घे, जानुनी, गुल्फे च सुघटिताः सम्पद्यन्ते। किं बहुना, व्यायामेन शरीरम् अतीवाकर्षकं दृश्यते। द्रष्टारः प्रशंसाभावेन व्यायामशीलं विलोकयन्ति।

अस्माकं ये ये प्रेरणाप्रदायकाः भगवदवताराः आदर्शपुरुषाश्च सन्ति, ते सर्वे सुघटितशरीरा आसन्। रामस्य सुघटितानामङ्गानां यादृशं वर्णनं रामायणे उपलभ्यते किं तादृशं सुघटितं शरीरं व्यायाम-रहितस्य जनस्य भवितुं शक्नोति? दुर्दान्तवीरस्य परशुरामस्य सुपुष्टं शरीरं किं व्यायामं विनैव तादृशान्यद्भुतकर्माणि कर्तुं शशाक? श्रीराम-भक्तो हनूमान् व्यायामशीलत्वादेव लङ्कासमरे तत्तदद्भुतम् अनुष्ठितवान्। अद्यापि हनूमान् सर्वेषां व्यायामशीलानां, विशेषतो मल्लानाम् आदर्शः आस्ते।

महाभारते पाण्डवानां व्यायामशालितायाः प्रचुराणि प्रमाणानि प्राप्यन्ते। विशेषतो भीमस्य व्यायामशीलता अतीव श्लाघनीया आसीत्। व्यायामबलेनैव स सर्वान् कौरवान् अध्ययनकालत एव अति-शेते स्म। अर्जुनोऽपिदिवसं यावद् सततं धनुः प्रकर्षन्नपि व्यायामाभ्यास-बलेन श्रान्तो न भवति स्म। कौरवेष्वपि दुर्योधन-दुशासनयोः व्यायाम-शीलतायाः प्रमाणं प्राप्यते।

रघुवंशादिषु महाकाव्येषु, अभिज्ञानशाकुन्तलादिषु नाटकेषु ये नायका उपन्यस्तास्तेषां शरीराणि व्यायामबलेन प्रकामम् आकर्ष-काण्यासन्। वर्तमानयुगेऽपि महाराणाप्रताप-शिववीरादयः अद्भुताभटाः व्यायामशालित्वादेव तथा बलधामानोऽभवन्। क्रान्तिकारिण-श्चन्द्रशेखर 'आजाद'स्य व्यायामशीलं (चित्रगतं) शरीरं कस्य नेत्रे प्रसभं न समाकर्षति?

व्यायामस्य बहवः प्रकाराः सन्ति। केचन व्यायामा एकाकिनैव विधीयन्ते। बहवो व्यायामाः समूहबद्धतया सम्पाद्यन्ते। योगासन-प्राणायाम-जलसंतरण-धावन-चक्रदण्ड-मुद्गरोत्तोलनप्रभृतयो व्यायामा एकाकिना कर्तुं शक्यन्ते। अथ च प्रतियोगितायां संघबद्धतयापि विधीयन्ते। मल्लयुद्ध-कबड्डी-हस्तकन्दुकक्रीडन-पादकन्दुकक्रीडन-क्रिकेट-हाकी-बैडमिण्टन टेनिसाद्यभिधाना बहवो व्यायामाः समूहम् अपेक्षन्ते। एतदतिरिक्ता अपि बहुविधा व्यायामाः स्वदेशे प्राप्तप्रचाराः स्थाने स्थाने लोकैर्विधीयन्ते।

गृहे, ग्रामे, नगरे, विद्यालये, कार्यालये, देशे, सर्वत्रैव व्यायामशील-गात्राणां जनानां प्रभावमण्डितं शरीरसौष्ठवं पृथगेव व्यज्यते।

अत्रैतद् ध्यातव्यं यद् व्यायामशीलैः पुष्टगात्रैर्जनैः स्वकीयं बलम् परपीडनाय न प्रयोक्तव्यम्। अन्यथा तेषां गणना रावणश्रेण्यां भविष्यति।

जनानां सर्वासां श्रेणीनां कृते व्यायामस्य पृथक् पृथगाचरणं श्रेयस्करम्। छात्रजनानाम् अन्येषां च बुद्धिजीविनां कृते व्यायामस्य मात्रा मल्लवृत्तिभ्यो जनेभ्यो न्यूना भवितव्या। परन्तु सर्वेषां जनानां कृते व्यायामः परमावश्यकः। अतः केनचित् सुविज्ञेन साध्वेव कथितम्—

व्यायामपुष्टगात्रस्य तेजो बुद्धिर्यशो बलम्।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत्॥

—:०:—

नारीशिक्षा

नारीणां शिक्षा तथैव उपयोगिनी वर्तते यथा पुरुषाणां शिक्षा। संसारे जनसंख्यायाः प्रायोऽर्धभागो नारीणां वर्तते। यदि नारीणां शिक्षणं न भविष्यति तदा अर्धः संसारो मूर्ख एव स्थास्यति।

गृहस्थाश्रमशकटस्य स्त्री-पुरुषौ चक्रस्थानीयौ स्तः। यदि शकटस्य एकं चक्रं सुश्लिष्टं भवति परन्तु अपरं चक्रं विश्लिष्टं भवति तदा चक्रस्य गतिर्भग्ना जायते। शकटस्य सम्यग् गत्यर्थं यथा चक्रद्वयस्य सुश्लिष्टता आवश्यकी भवति तथैव गृहस्थाश्रमस्य प्रगतये स्त्री-पुरुषयोः शिक्षा समानरूपेण आवश्यकी वर्तते।

प्राचीन-भारतीय-ग्रन्थेषु नारीशिक्षायाः प्रचुराणि प्रमाणानि समुपलभ्यन्ते। वैदिके युगे गार्गी-मैत्रेयी प्रभृतयो नार्यो विद्याबलात् समाजे ख्यातिमुपजग्मुः। शङ्कराचार्यस्य धर्मदिग्विजये शारदा-(भारती वा) नाम्ना पण्डितवर्यस्य मण्डनमिश्रस्य धर्मपत्नी शङ्कराचार्य-मण्डनमिश्रयोः शास्त्रार्थस्य अध्यक्षतां कृतवती। शङ्कराचार्येण शास्त्रार्थे स्वपत्यौ पराजिते सति शारदा स्वयं शङ्कराचार्येण सह शास्त्रर्थं कृत्वा तमपि पराजेतुं कृतोद्योगा बभूव।

संस्कृतसाहित्यस्य काव्येषु नाटकेषु च नारीशिक्षाया बहूनि प्रमाणानि प्राप्यन्ते। विज्जकासीतादीनां कवयितॄणां पद्यानि प्रसभं चेतो हरन्ति। कालिदासीयेऽभिज्ञानशाकुन्तले शकुन्तला पत्रपुटके नखसहायेन मन्मथलेखं लिखति। रघुवंशमहाकव्ये अजविलाप प्रकरणे महाराजोऽजः उपरतामिन्दुमुखीं दर्शं दर्शं तस्याः गुणान् स्मारं स्मारं विलपन् "प्रियशिष्या ललिते कलाविधौ" इत्याद्युदीरयन् तस्याः 'शिक्षां' स्मरति।

नैषधीयचरिते दमयन्ती श्लेषालङ्कारमाश्रित्य "का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदभिज्ञा" इति नलदूताय हंसाय स्वाभिप्रायं सखी समक्षं विशदीकरोति। इदं सर्वं नारी-शिक्षायाः अभावे न सम्भवति। इत्येतैः बहुभिः प्रमाणैरिदं प्रमाणितमस्ति यत्प्राचीनकाले नारी-शिक्षायाः प्रचार आसीत्।

यदा भारतं राष्ट्रं यवनाक्रमणैराक्रान्तमभवत्, तेषां दासतायाः बन्धने च निबद्धं सञ्जातम्, तदानीम् अराजकतावशात् नारीणां गृहान्निःसरणं वर्जितमभूत्। परिणामतो नार्यः पाठशालासु गन्तुमशक्ताः

सञ्जाताः । अतः तासां शिक्षाया ह्रासः सम्बभूव । तस्मिन् समये ता एव नार्यः शिक्षिता अभवन् यासां गृहेषु शिक्षाया व्यवस्था आसीत् ।

आंग्लशासकानां समये यदा अराजकताया नियन्त्रणमभवत् तदा नारी-शिक्षायाः पुनः सञ्चारः समजायत । नारी-शिक्षायै महर्षिदयानन्दादयोऽपि महान्तं प्रयत्नमकुर्वन् । ततः परं स्वतन्त्रे भारते नारी-शिक्षायाः कृते सर्वकारेणापि प्रयतितम् । समाजोऽपि नारी-शिक्षायाः सम्बन्धे जागरूको जातः । बालकैः समं समानरूपेण बालिका अपि शिक्षां प्राप्नुवन्ति ।

सम्प्रति शिक्षाबलेन न केवलं शिक्षा-विभागे, अपितु अपरेष्वपि विभागेषु ताः नियुक्तिं लभन्ते । सरोजिनीनायडूमहाभागा शिक्षाबलेन भारतस्य प्रमुखेषु पदेषु नियुक्ता बभूव । इदानीं नार्यो न्यायाधीशपदं, जनपदाधिकारिपदं मन्त्रिपदं च अधितिष्ठन्ति । भारतराष्ट्रस्य प्रधानमन्त्रिपदम् अलङ्कुर्वाणा इन्दिरागान्धिमहोदया नारीणां शिक्षाकृतोन्नतेः परमं निदर्शनं वर्तते ।

शिक्षाबलेन पुरुषैः समं नारीष्वपि आत्मसम्मानं जागरितं भवति । 'उद्धरेदात्मनात्मानं नात्मानमवसादयेत्' इति गीतावचनम् आत्मोद्धाराय उपदिशति । आत्मोद्धाराय शिक्षायाः परमावश्यकता । शिक्षिता नारी आत्मोद्धारं कुर्वन्ती स्वकीयं परिवारं समुद्धर्तुं शक्ता भवति । शिक्षिता नारी स्वसन्ततीः बाल्यकालादेव तथा शिक्षयति यथा ताः शोभनाः नागरिकाः भवन्ति ।

नारीशिक्षायां गृहविज्ञानादयो विषयाः अनिवार्यरूपेण पठयितव्याः, यतो हि गृहविज्ञानादिविषयाणां गृहकार्येषु महती उपयोगिता वर्तते । नारीणां पाठ्यक्रमे धार्मिकशिक्षाया अपि अनिवार्यता भवेत्, यतो हि नास्तिका नार्यो भोगवादपरा भूत्वा महदनिष्टम् आचरन्ति समाजस्य । आस्तिकाः एव नार्यः स्वसन्ततीः सदाचारपरायणाः कर्तुं शक्नुवन्ति । अतो नारीशिक्षायाम् आध्यात्मिकाः विषयाः अनिवार्यरूपेण अध्यापयितव्याः ।

—:०:—

अनुशासनम्

'अनु' इति उपसर्गपूर्वकात् 'शासु अनुशिष्टौ' इति धातोः ल्युट्प्रत्यये कृते सति (अनु+शासु+ल्युट्) 'अनुशासनम्' इति पदं निष्पद्यते। अनुशासनस्य जीवनेऽत्यन्तं महत्त्वमस्ति। अनुशासनं विना गृहस्य, विद्यालयस्य, कार्यालयस्य, समाजस्य, देशस्य, विश्वस्य वा काचिदपि व्यवस्था सम्यक्प्रकारेण चलितुं न शक्नोति।

विद्यालयेऽपि यदि छात्राः गुरुजनानाम् अनुशासने न तिष्ठन्ति त[ो] अध्ययनम् अध्यापनं च समीचीनतया न भवति। छात्रैरेव आगामि[नि] काले समाजस्य राष्ट्रस्य च भारो वोढव्यो भवति। यदि छा[त्राः] अध्ययनपराङ्मुखाः असंस्कृताः अनुशासनहीनाश्च भविष्यन्ति तदा सम[ाजे] राष्ट्रे च अराजकता संवर्धिता भविष्यति।

अध्ययनशीलोऽनुशासनप्रियो विद्यार्थी एव राष्ट्रस्य श्रेष्ठो नागरिकः भवति। अत्रैतद् विचारणीयं यत् 'शिष्य'-शब्दोऽपि 'शासु अनुशिष्टौ' इति धातोरेव निष्पन्नो भवति। अतः शिष्यस्य अनुशासनेन सह घनिष्ठः सम्बन्धोऽस्ति। इदानीं विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च शिष्याणाम् अध्यापकानां च मध्ये संघार्षाणां वार्ताः श्रूयन्ते। संघर्षाणां मूलेऽनुशासनहीनतैव भवति।

अनुशासनपरायणाय शिष्याय गुरवः सरहस्यं ज्ञानं प्रयच्छन्ति—

'ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत।'

—श्रीमद्भागवतम्॥

शिष्यैः सदैव गुरुजनानाम् अनुशासने स्थातव्यम्। गुरुजनानाम् आदेशानां परिपालका एव शिष्याः राष्ट्रस्य विश्वस्य च महान्ति पदान्यधितिष्ठन्ति। 'आचार्यदेवो भव' इति श्रुतेरादेशः। समावर्तन-संस्कार-समये समग्रजीवनस्य कृते आचार्यः 'सत्यं वद। धर्मं चर। स्वाध्यायान्मा

...:।' इत्याद्युपदिशति। जीवनस्य कृतार्थतायै इदमाचार्यानुशासनं ...ज्जीवनं शिष्यैः परिपालनीयम्।

कार्यालयेष्वपि अनुशासनस्य महती महत्ता। अधिकारिणाम् ...देशान् यदि लिपिकाः सेवकाः, कार्यार्थिनश्च न परिपालयन्ति, तदा ...र्यालयानामपि कार्याणि सम्यग् भवितुं न शक्नुवन्ति।

समाजे यदि लब्धप्रतिष्ठानां समाजकार्यकर्तॄणां महानुभावानां जना-...अनुशासनस्य सततम् अवमानना भविष्यति तदा समाजस्य प्रगतौ ...न् अवरोधो भवति। अत एव समाजेऽपि अनुशासन-परिपालनस्य ... आवश्यकता वर्तते। समाजे स्वीकृतसिद्धान्तानां परिपालनमेव ...विकम् अनुशासनपरिपालनं वर्तते।

...ष्ट्रस्य कृतेऽनुशासनस्य सर्वोपरि महत्ता विद्यते। राष्ट्रस्य सीमानां ...यै विशालायाः सुशिक्षिताया अनुशासनसूत्रबद्धायाः सेनायाः ...श्यकता भवति। सेनायाः सञ्चालनम् अनुशासनेनैव भवति। सुशिक्षितायां सेनायामपि यदनुशासनं शिथिलं भवति तदा सा सेना ...फलतां न प्राप्नोति। राष्ट्रस्य अभ्यन्तरेऽपि चौरेभ्यो दस्युभ्योऽसामा-...कतत्त्वेभ्यश्च जनतायाः सुरक्षार्थम् आरक्षि-दलस्य आवश्यकता ...वति। आरक्षिदलेऽपि अनुशासनस्य तथैव महत्त्वं वर्तते यथा ...नायाम्।

विश्वशान्त्यर्थमपि सर्वेषां राष्ट्राध्यक्षाणां कृते स्वीकृतसिद्धान्तानां सन्धीनां वा परिपालनाय अनुशासनबद्धतायाः महती महत्तास्ति। एवं हि सिद्धमिदं यज्जीवनस्य सर्वेषु क्षेत्रेष्वनुशासनस्य महती आवश्यकता वर्तते। अनुशासनं विना क्वचिदपि किमपि कार्यं शोभनप्रकारेण न संचलति। अनुशासनं हि समृद्धीनाम् मूलम्। यद्यप्यनुशासनपरिपालने प्रथम कष्टमनुभूयते, परन्तु तस्य परिणामः सुखावहो भवति। अनु-शासनेन सात्त्विकं सुखं संजायते।

—:०:—

प्रजातन्त्रम्

प्रजानां कृते प्रजाभिः निर्वाचितैः जनैः विनिर्मिता प्रशासन‍ 'प्रजातन्त्रम्' इत्युच्यते। प्रजातन्त्रपद्धतिः भारतवर्षस्य कृते न नास्ति। पुरापि राजतन्त्रेण सार्धं गणतन्त्रपद्धतेः प्रमाणानि प्राप श्रीकृष्णस्य गणराज्यं, वैशाल्यां लिच्छिवीनां च गणराज्यम् इति प्रसिद्धे स्तः।

इक्ष्वाकुप्रभृतयः सूर्यवंश्याः राजानः, नहुष-ययात्यादयः चन्द्रवं नृपतयो राजतन्त्रीया एवासन् येषां प्रशासने जनता सुखिनी आसीत राम-युधिष्ठिरौ राजतन्त्रीयौ नृपौ आस्ताम्। तयोः काले प्रजा आत सुखभाग् आसीत्। परन्तु सर्वे राजानो रामयुधिष्ठिरसदृशाः भवितुं न शक्नुवन्ति। राजतन्त्रेऽधिकाराणाम् एकत्रैव पुञ्जीभूतत्वात् नृपस्य निरङ्कुशतायाः अतीव सम्भावना भवति। रावण-कंस-जरासन्धादयो-ऽधिकाराणाम् एकत्रैव पुञ्जीभूतत्वाद् भृशं निरंकुशाः भूत्वा प्रजा-मपीडयन्। वर्तमानशताब्द्यां हिटलरादयो राजतन्त्रस्य निरङ्कुशताया निदर्शनानि सन्ति।

प्रजातन्त्रे प्रत्येको नागरिकः स्वविचारान् प्रकटयितुं समर्थो भवति। प्रजातन्त्रे सर्वकारस्य दोषा अपि वक्तुं शक्यन्ते। राजतन्त्रम् आनुवंशि भवति, परन्तु प्रजातन्त्रे आनुवंशिकी परम्परा आवश्यकी नास्ति। प्रजातन्त्रे निर्वाचितो जनसेवकः एव प्रशासनस्य कर्णधारो भवति। जनता च तमेव निर्वाचयति यो जनानां भावनानुसारं कार्यप्रणालीं वृणुते।

प्रजातन्त्र-प्रणाल्यां राष्ट्रपतिपदं सर्वोच्चं भवति। राष्ट्रपतिः निर्वाचित-जनप्रतिनिधिभिः निर्वाचितो जनसेवको वर्तते। राष्ट्रपतिः स्थलसेनायाः, जलसेनायाः, व्योमसेनायाश्च सर्वोच्चोऽधिकारी भवति। स खलु प्रधानमन्त्रिणं नियुनक्ति। प्रधानमन्त्री मन्त्रिमण्डलं नियुनक्ति,

ावस्था राष्ट्रस्य केन्द्रे भवति। सर्वेषां निर्वाचित-सदस्यानां कार्यं-
पञ्चवार्षिको भवति। यदि निर्वाचितदलस्य कार्यं सन्तोषजनकं
.ति तदा "मध्यावधि-निर्वाचनं" विधीयते।

राष्ट्रस्याङ्गभूतेषु प्रदेशेषु राष्ट्रपति-प्रतिनिधिः राज्यपालः सर्वं-
ो भवति। स मुख्यमन्त्रिणं नियुनक्ति। मुख्यमन्त्री मन्त्रिमण्डलं
क्ति।

प्रजातन्त्रपद्धतौ राष्ट्रस्य केन्द्रे एका लोकसभेति संसद् भवति। संसदर्थं
ाचिताः जनप्रतिनिधयः 'सांसदाः' इत्युच्यन्ते। तत्रापरा राज्यसभा
ति यस्यां सर्वेभ्यः प्रदेशेभ्यो मनोनीताः सदस्याः सुविराजन्ते।
'कसभया ये विधेयकाः पार्यन्ते त एव राज्यसभया समनुमोदिताः
विधानानि भवन्ति।

एवमेव प्रदेशेषु एका विधानसभा भवति। विधानसभायाः जनतया
निर्वाचिताः सदस्याः 'विधायकाः' इत्युच्यन्ते। अपरा विधानपरिषदिति कथ्यते
यत्र दलानां मनोनीताः सदस्याः सुविराजन्ते। अस्माकं राष्ट्रं १९४७
तमे वर्षे स्वतन्त्रमभूत्। भारतीयं गणतान्त्रिकं संविधानं १९५० तमात्
ख्रिष्टाब्दतः प्रवर्तितम्।

प्रजातन्त्रे यदि जनता प्रबुद्धा भवति, तदा राष्ट्रस्य भृशमुन्नतिः
संजायते। प्रबुद्धा जनतैव योग्यव्यक्तिं निर्वाचयितुं शक्नोति अन्यथा गड्ड-
प्रवाहसदृशा जनता अयोग्यव्यक्तिं निर्वाच्य राष्ट्रं रसातलं नयति।
'सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः" इति गीतावचनानुसारं
सर्वेषु कार्येषु दोषराहित्यं नास्त्येव। तथैव प्रजातन्त्रेऽपि कतिपये
दोषाः वर्तन्ते। तथा हि अस्यां प्रणाल्यां क्षेत्रवादेन समं जातिवादः
प्राबल्येन प्रवर्तते भाषावादोऽपि चाल्यते। निर्वाचनकाले जनप्रतिनिधयो
येन केन प्रकारेण विजेतुमिच्छन्ति। साधनस्य पवित्रतायां किञ्चिदपि
ध्यानं न दीयते। निर्वाचनेषु सर्वैः दलैः प्रायो जातिवादस्य आश्रयो
गृह्यते। किन्तु जातिवादस्य प्रवर्तनं राष्ट्रस्य कृते हानिकारकं वर्तते।
जातिवाद-भावनया कार्यकरणेन मानवः सङ्कीर्णभावनया ग्रस्तो

भवति । सङ्कीर्णभावना व्यक्तित्वस्य विकासं निरुणद्धि । यद्येते दोषाः प्रजातन्त्रप्रणाल्यां न स्युः तर्हि प्रजातन्त्रसन्निभं किमपि प्रशासनतन्त्रं नास्ति । अतएव प्रजातन्त्रस्य परिष्काराय नेतृभिः अपरैश्च जन-प्रतिनिधिभिः उपर्युक्ताणां दोषाणां परित्यागः कर्तव्यः ।

—:०:—

भारतीयसंस्कृतौ नारीणां स्थानम्

(यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः)

भारतीयसंस्कृतौ नारीणां समादरणीयं स्थानं विद्यते । कौमार्ये सा पितुर्गेहे निवसन्ती पूजनीयतामावहति । मातापितरौ पुत्रकृतां चरणसेवां स्वीकुरुतः, परं कन्याकृतां चरणसेवां तस्याः पूज्यभावं पुरस्कृत्य न स्वीकुरुतः । भ्रातरो रक्षाबन्धनादि-शुभावसरेषु भगिनी-निबद्धं रक्षासूत्रं स्वीकृत्य तस्यै वस्त्राणि अलङ्कारान् रूप्यकाणि वा प्रदाय तस्याः सम्मानं कुर्वन्ति । भातृद्वितीयायामपि भ्रातॄणां कृते भगिन्यो मङ्गलकामनाः कुर्वन्ति, भ्रातरश्च ताभ्यो वस्तूनि रूप्यकाणि वा प्रदाय ताः सभा-जयन्ति ।

यात्राकालेऽपि कन्याया दर्शनं सुमङ्गलाय कल्पते । विवाहावसरेऽपि मातापितरौ भ्रातरो पितृव्यादयः तथा चान्ये सम्बन्धिनः कन्यायाश्चरणौ पूजयन्ति । इमानि नारीणां कन्यारूपे समादरस्य प्रमुखानि मूलग्राहीणि प्रमाणानि ।

अथ विवाहानन्तरं यदा कन्या पुण्यं गृहिणीपदं लभते तदानीमपि तस्याः पूजनीयतायाः प्रमाणानि भारतीयसंस्कृतौ बद्धमूलानि सन्ति ।

चतुराश्रमेषु गृहस्थाश्रमः प्रमुखतम आश्रमः । 'गृहस्थाश्रमः' इत्य-स्मिन् गृहपदं निवासस्थानवाचकं नास्ति, अपि तु गृहपदं गृहिणीवाचकं वर्तते । अत उक्तम्—

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
गृहं हि गृहिणोहीनमरण्यसदृशं स्मृतम् ॥

गृहस्थाश्रमो गृहिणीं विना न सिद्धयति। भारतीयसंस्कृतौ 'विवाहः' धर्मकर्मणां कृते भवति, विवाहस्य उद्देश्यं न केवलं भोगसाधनम्। भोगस्तु तस्य आनुषङ्गिकं फलम्। महायज्ञेषु केवलम् पत्नीवान् अधिकारी भवति। अतः मर्यादापुरुषोत्तमो भगवान् रामचन्द्रः सीतानिर्वासनानन्तरं सीतायाः स्वर्णप्रतिमां समीपीकृत्यैव अश्वमेधयज्ञस्य अधिकारी बभूव। भार्यां विना गृहस्थाश्रमस्य इष्टापूर्तादियो धर्माः न फलन्ति। भार्यैव पुरुषस्य परमं मित्रम्। उक्तञ्च—

नास्ति भार्यासमम् मित्रम्।

महाकविकालिदासग्रथिते रघुवंशमहाकाव्ये अजविलापप्रकरणे गृहस्थाश्रमे पत्न्याः विविधरूपाणां स्मरणं कियद् हृदयग्राहि—

गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ ॥

अतः परं नार्याः महत्त्वपूर्णं रूपं मातृरूपं वर्तते। मातृस्वरूपं नार्याः दायित्वपरिपूर्णं उत्कृष्टतमं स्वरूपमस्ति। सन्ततये गर्भभारवहनकष्टं सहमाना नारी प्रसववेदनामनुभूय शिशुं प्रसूते। ततः परं तत्पालनपोषणपरायणा भूत्वा स्वसुखमविगणय्य सन्ततेर्मलमूत्रादिकं क्षालयन्ती स्नानादिना शिशुं स्वच्छीकृत्य वस्त्रादिभिर्भूषयित्वा तं लालयति हासयति। समये समये दुग्धदानादिना शिशुं पोषयति। शिशुकष्टे कष्टं तत्सुखे सुखं मन्यमाना सततं सावधाना तिष्ठति। न केवलं बाल्यावस्थायाम्, अपि तु यावज्जीवनं सन्ततिकष्टे कष्टं तत्सुखे सुखमनुभवन्ती माता कस्य पूजनोया नास्ति। नार्याः मातृस्वरूपस्य महिमा वेदेऽपि वर्णितः। वेदस्यायमादेशो यन्मातरं प्रतिदेवताबुद्धिं कुरु। यथा—

'मातृदेवो भव।' इति

इत्थं नार्याः कन्यारूपस्य, भगिनीस्वरूपस्य, पत्नीस्वरूपस्य, मातृस्वरूपस्य च पूज्यताया वैशिष्ट्येन प्रमाणपुरःसरं निदर्शनानि निर्दिष्टानि।

एतदतिरिक्तं यानि यानि नार्याः अपराणि स्वरूपाणि सन्ति तान्यपि सुस्निग्धानि सम्माननीयानि च विलसन्ति। अतः खलु मनुरपि मनुस्मृतौ नार्याः पूजनीयतां स्वीचकार। यथा—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥

—:०:—

विश्वशान्तिः

यथा गृहस्य, ग्रामस्य, नगरस्य, देशस्य वा सुखसमृद्धये शान्तिः अपेक्ष्यते तथैव विश्वस्य सुखसमृद्धयर्थं शान्तेरावश्यकतास्ति। यथा शान्तिसम्पन्नं गृहं ग्रामस्य नगरस्य वा अशान्त्या प्रभावितो भवति, यथा च सुखसमृद्धियुक्तो ग्रामो नगरं वा देशस्य अशान्त्या प्रभावितो भवति तथैव सुखसमृद्धियुतो देशो विश्वस्य अशान्त्या प्रभावितो जायते। अतः सर्वविधसुख-शान्ति-समृद्धयर्थं विश्वशान्तेः महती आवश्यकता आस्ते। सुखं हि शान्तिसम्पन्नो जनः एव प्राप्नोति। शान्तिहीनस्य सुखं कुतः? यथोक्तं श्रीमद्भगवद्गीतायाम्—

"अशान्तस्य कुतः सुखम्" इति।

इदानीं विश्वगगने युद्धस्य प्रलयङ्कराः घटाः अणुबमादिभिरस्त्रविद्युद्भिः विद्योतन्ते। शक्तिसम्पन्नाः देशाः निर्बलान् देशान् अधीनीकुर्वन्ति। सभ्यताः संस्कृतीश्च विनाशयन्ति। इतिहासस्य विलोकनेन इदं सुस्पष्टं भवति यद् यदा कोऽपि देशो युद्धजन्यया अशान्त्या मुक्तो भवति तदानीं तस्य बहुविधो विकासो जायते। वैदिककाले अस्माकं देशे प्रायः शान्तिरासीत्। तदानीं देशस्य अनेकमुखो विकासोऽभूत्

भारतीयेतिहासे गुप्तकालः "स्वर्णकालः" कथ्यते। तस्मिन् कालेऽस्माकं देशः समृद्धिप्राचुर्येण "स्वर्णविहङ्गमः" इत्याख्यां लब्धवान्।

तादृशी समृद्धिः कलानामुन्नतिः तदैव सिद्धयति यदा देशे संसारे च अशान्तं वातावरणं न भवति ।

प्राचीनकाले जगतः एकस्मिन् भागे घटितानां घटनानां प्रभावोऽपर-स्मिन् भागे न भवतिस्म । किन्तु साम्प्रतिके जगति विज्ञान-विकासेन समग्रं जगद् अतिसन्निकटं जातम् । इदानीं जगतः एकस्मिन् भागे घटितस्य घटनाचक्रस्य प्रभावोऽपरस्मिन् भागेऽवश्यमेव भवति । एतस्मात् कारणात् शान्तिप्रियाणाम् आत्मविकासपरायणानां देशानामपि शान्तिः विघ्निता भवति ।

सम्प्रति महाशक्तिसम्पन्नस्य अमेरिकादेशस्य सोवियतसंघेन सह अत्युत्कटा प्रतिस्पर्धा वर्तते । इयं तयोः प्रतिस्पर्धा न केवलं स्थले एव वर्तते, अपि तु समुद्रेऽन्तरिक्षे च एतयोः महाशक्तिसम्पन्नयोः देशयोः प्रतिस्पर्धा अनुक्षणं विद्यमानास्ति । एतत्कारणेन निखिलः संसारः संघ-द्वये विभक्तो वर्तते । ये च तटस्था अपि देशाः सन्ति तेऽपि अनयोः प्रतिस्पर्धया प्रभाविताः भवन्ति । एतयोः प्रतिस्पर्धावशाद् यद्येकः कस्य-चिद् देशस्य साहाय्यं करोति तर्हि अपरस्तस्य अविचारितं विरोधं विदधाति । यदि चैकः कमपि विरुणद्धि तर्हि द्वितीयस्तस्य सहायतां करोति । जगतो लघ्वी घटनापि एतयोर्देशयोः हस्तक्षेपेण विशालं रूपं भजते । विनाशक-शस्त्रास्त्राणां निर्माणे प्रतिस्पर्धावशाद् उभौ देशौ तादृशानि अणुशक्तिसम्पन्नानि आयुधानि निर्मितवन्तौ यानि क्षणेनैव संसारस्य संहारं कर्तुम् पारयन्ति । एतयोः अतिरिक्ताः देशाः अपि स्वस्य स्वस्य अस्तित्वस्य रक्षणाय यथासाधनम् अणुशक्तिसम्पन्नानाम् आयुधानां विनिर्माणे संलग्नाः सन्ति ।

यथा पुरा सिंहकारकाः पण्डिताः केनचिद् दूरदर्शिना बुद्धिमत । प्रबोधिताः अपि स्वविद्योत्कर्षप्रदर्शनाय सिंहनिर्माणं कृतवन्तः तथैव विश्वस्य वैज्ञानिका स्वस्य विज्ञानस्य चरमोत्कर्षप्रदर्शने संलग्नाः विश्वघातेन सह आत्मघातं नावलोकयन्ति । यथा सिंहकारकाः स्व-निर्मितेन सिंहेनैव आत्मविनाशं जग्मुः तथैव अदूरदर्शिनो वैज्ञानिकाः

सततं विनाशसामग्रीं विनिर्माय मानवजातिम् उन्मूलयन्तः स्वस्यापि विनाशं करिष्यन्त्येव।

रोषः खलु शान्तिं नाशयति। यद्येकोऽपि अणुशक्तिसम्पन्नो देशोऽशान्तः क्रोधाविष्टो भूत्वा अण्वायुधानां प्रयोगं कुर्यात् तर्हि अपरोऽपि आक्रान्तः सन् शत्रुदेशे अण्वस्त्राणां प्रहारं करिष्यत्येव। एवं हि समग्रे जगति अणुयुद्धस्य प्रवर्तनं भवितुं शक्नोति। समग्रे संसारेऽणुयुद्धे प्रारब्धे घातकाणां वाष्पाणां प्रभावेण मानवानाम् अन्येषां च जीवानां महाविनाशः क्षणेनैव भवितुं शक्नोति।

महाशक्तिसम्पन्नाः देशाः, तेषामनुयायिनः, अथ च तटस्थाः सर्वे देशाः परस्परं मिलित्वा मानवजातेः सुरक्षायै विचारं कुर्युः यद् यदि तेषां पराक्रमेण संसारे मानवसमाजः एव उन्मूलितो भविष्यति तदा तेषामुत्कर्षस्य, तेषां वैज्ञानिकप्रगतेः को लाभः? अतएव सर्वैः देशैः परस्परं मिलित्वा मानवजातेः कल्याणाय विश्वशान्तेरुपरि विचारः करणीयः। विश्वशान्तिः एव अणुशक्तिसम्पन्नं संसारं सुरक्षितं कर्तुं शक्नोति।

—:०:—

विद्या

(विद्याधनं सर्वधनप्रधानम् अथवा विद्या ददाति विनयम्)

विद्यते ज्ञायतेऽनयेति विद्या इति रूपेण परमं यशोऽधिगच्छत् विद्यापदं ज्ञानार्थकविद्धातोः क्यप् प्रत्यययोगात् निष्पद्यते। सामान्यतः अस्यार्थः भवति 'ज्ञानम्'।

आदिकालादेव विचारशीलो मनुष्यो विद्यायाः सर्वश्रेष्ठत्वं स्वीकृतवान्। उपनिषत्काले विद्यायाः द्वे स्वरूपे स्वीकृते परा अपरा चेति। पराविद्या मोक्षसाधिका भवति। अपरा मानवकृते सांसारिकसुखसाधनं

वैभवमयजीवनं वितनोति। उपनिषदि द्वयोरपि विद्ययोरध्ययनस्य उपयोगिता प्रतिपादिता—

विद्यां चाविद्यां च यस्तद्वेदोभयैः सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥

विद्यां विना मनुष्यः पशुतुल्य एव। विद्याध्ययनेन मानवस्य रूपम् अधिकं चकास्ति। विद्या प्रच्छन्नं धनं वर्तते। विद्यया उपभोगसाधनानि उपलभ्यन्ते। यत्र स्वस्य कोऽपि परिचितो न भवति तत्र विद्या बन्धुवत् सहायतां करोति। राजसु प्रशासकेषु वा विद्यायाः एव प्रतिष्ठा वर्तते। न तु धनस्य। तद्यथा—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं।
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः॥
विद्या बन्धुजनो विदेशगमने विद्या परा देवता।
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥

विद्यैव मानवे विनयाधानं करोति। विद्ययैव मानवो योग्यताम् प्राप्नोति। योग्यतया वृत्तिसाधनं धनं लभ्यते। अथ च धनेन दानादि-धर्मकर्माणि क्रियते। जीवनोपयोगीनि वस्तूनि प्राप्य मानवः सुखमयं जीवनं यापयति। सुखमयजीवनाय तन्मूले विद्यैव तिष्ठति—

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥

विद्या मातेव रक्षणं करोति, पितेव हितकरेषु कार्येषु नियुनक्ति, पत्नीव खेदं दूरयति। श्रियः यशसश्च विस्तारं करोति। एवं हि विद्या मनुष्याय किं किं न सम्प्रददाति—

मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं,
किं किं न साधयति कल्पलतेव विद्या॥

वस्तुतः विद्यैव मानवं पशुभ्यो भिन्नं करोति। अन्यथा मानवे पशौ

वा को भेदः ? मनुष्येष्वपि ये विद्यां न धारयन्ति तेषां जीवनं पशुप्रायं विद्यते।

विद्यायाः विकासस्यैव इदं फलं यत् सम्प्रति विश्वम् एकं गृहमिव संजातम्। वैज्ञानिकाविष्कारा: अपि विद्यायाः एव फलानि। इदानीं विश्वस्य एकस्मिन् कोणे संस्थितः सन्नपि जनः विश्वस्य कस्मिन्नपि स्थाने स्थितेन जनेन सह वार्तां कर्तुं क्षमोऽस्ति। रेलयान-जलयान-वायुयानानि विद्याया एव फलानि। विद्युतः आविष्कारोऽपि विद्याया अमृतं फलम्। विद्युतः प्रभावेण जगतः कीदृशो विकासो जातः। यद्यपि कैश्चिद् विषम-मतिभिः अण्वस्त्राणि विद्याबलान्निर्माय संसारेऽपूर्वं भयमुत्पादितम्, यदि जगतः प्रशासकाः विद्याबलाद् उपलब्धायाः अणुशक्तेः शान्तिमय-कार्येषु उपयोगं कुर्युस्तर्हि मानवजीवनं स्वर्गसन्निभं भवितुं शक्नोति।

विद्यायाः इदं महद् वैशिष्ट्यं यदियं चोरैः चोरयितुं न शक्यते, राजभिः प्रशासकैर्वा दण्डादिरूपेण अपहर्तुं न शक्यते। भ्रातरोऽपि विद्यायाः विभाजनं कर्तुं न शक्ताः। विद्यायां कोऽपि भारो न भवति यथा यथा विद्यायाः व्ययः क्रियते तथा तथेयं वर्धते। ईदृशी विशेषता संसारस्य अन्यस्मिन् कस्मिन्नपि धने नास्ति। अतः विद्याधनं सर्वधनेषु प्रधानमस्तीति कथनं समीचीनमेव—

न चौरहार्यं न च राजहार्यं,
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं,
विद्याधनं सर्वधनप्रधानम्॥

--: ० :--

विद्वान् सर्वत्र पूज्यते

विदुषः पूजनं वस्तुतः विद्यायाः एव पूजनं विद्यते। विद्याधारकः एव विद्वान् इत्युच्यते। यद्यपि जगति सर्वेषु कर्मसु धनस्य आवश्यकता अनुभूयते। विद्वांसोऽपि प्रायः धनेहया धनवतां द्वारं सेवन्ते। सम्प्रति अधोलिखितः श्लोकः प्रायेण जनानां जिह्वाग्रे नर्तक इव नरीनृत्यते—

अस्य दग्धोदरस्यार्थे किं न कुर्वन्ति पण्डिताः।
वानरीमिव वाग्देवीं नर्तयन्ति गृहे गृहे॥

एतेनापि विदुषः विद्वत्तायाः महिमा क्षीणो न भवति। न जाने कियन्तो धनवन्तो महान्तं धनराशिं दधानाः पञ्चत्वं प्राप्ताः। तेषां नामान्यपि न श्रूयन्ते। परन्तु जगतीतले ये ये महत्त्वशालिनः विद्वांसोऽभूवन् तेऽद्यापि स्वयशःशरीरेण जीवन्ति।

प्रथमे विद्वांसः वशिष्ठ-याज्ञवल्क्यादयः ऋषयः सन्ति। ततः वाल्मीकि-व्यासादयः प्रथितकीर्तयोऽभूवन्। यास्क-पाणिनि-कात्यायन-पतञ्जलि-शङ्कराचार्यप्रभृतयः विदग्धाः, भास-कालिदास-भारवि-माघ-बाणभट्टादयो विद्वांसो महाकवयः कस्य (जनस्य) समादरभाजनानि न सन्ति? अष्टदेवोपमो नृपतिरपि विदुषः समतां कर्तुं न पारयति, किमुत वराकाः श्रेष्ठिनः।

यद्यपि राज्ञः पदम् अतिशयमहनीयं भवति। तस्य महिम्नो विषये शास्त्रेषु समुदीरितमस्ति—

सोऽग्निर्भवति वायुश्च सोऽर्कः स धर्मराट्।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः॥

अर्थात् राज्ञि अग्नेः, वायोः, सूर्यस्य, चन्द्रमसः, धर्मराजस्य, कुबेरस्य, वरुणस्य, देवराजस्य इन्द्रस्य च समवेतः प्रभावो भवति। एतादृशाः प्रभावपूर्णाः नरपतयोऽपि विदुषां पूजाम् आचरितवन्तः इत्यस्य शतशः प्रमाणानि संस्कृतसाहित्ये समुपलभ्यन्ते। रघुवंशमहाकाव्ये महाराजेन

रघुणा विहिता कौत्सस्य सपर्या विश्वविश्रुतैव। विश्वस्मिन् "नोबुल"-पुरस्कारादयः विदुषां समर्चनायाः एव प्रकाराः सन्ति।

राज्ञः समर्चनं प्रायः स्वकीये देशे भवति। स्वकीये देशेऽपि बहवः प्रच्छन्नाः विद्रोहिणः राज्ञः पराभवं कामयमानाः तिष्ठन्ति। प्रजया विहिते राज्ञः समर्चने प्रायेण राजकृतं दण्डभयमपि जागर्ति। परन्तु विदुषः सभाजनं केनचिद् दण्डभयेन न क्रियते। श्रद्धां पुरस्कृत्यैव समाजो विदुषः समादरं समाचरति।

नृपस्य कृते परराष्ट्रेषु भयस्य स्थितिः सदैव जागर्ति। परराष्ट्रेषु तस्य समर्चने षड्यन्त्रस्य सदैव सम्भावना भवति। किन्तु विदुषः पूजा परराष्ट्रेष्वपि श्रद्धयैव विधीयते। अतः सम्यगेवोक्तम्—

विद्वत्वं च नृपत्वं च नैव तुल्ये कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

—:०:—

संस्कृतभाषायाः महत्त्वम्
अथवा
दिव्या गीर्वाणभारती

विश्वस्य सर्वासां भाषाणां मध्ये संस्कृतभाषायाः महत्त्वं सर्वोपरि वर्तते। यथा संस्कार-सम्पन्नाः जनाः संस्कारसम्पन्नानि वस्तूनि वा सर्वत्र समधिकं महत्त्वं प्राप्नुवन्ति तथैव संस्कारसम्पन्ना संस्कृतभाषा जगतः सर्वासु भाषासु अधिकं विराजते। अस्याः भाषायाः देववाणी, अमरभारती, सुरभारती, दैवीवाग्, गीर्वाणवाणीत्यपरनामानि विलसन्ति। संस्कृतभाषा सरला मधुरा सुबोधा चास्ति—

भाषासु मधुरा मुख्या श्रेष्ठा गीर्वाणभारती।

संस्कृतभाषायां विश्वस्य प्राचीनतमो ज्ञानालोकप्रदायकः ऋग्वेदो

नाम ग्रन्थः सर्वप्रथमम् उपनिबद्धः। ततो यजुर्वेदस्य सामवेदस्य अथर्ववेदस्य च सूक्तानि प्रादुरभूवन्। यदा सभ्यं मन्यमानाः विदेशीयाः आधुनिकाः जातयः पशुप्रायं जीवनं जीवन्ति स्म तदा आर्याः ऋग्वेदं यजुर्वेदं, सामवेदम्, अथर्ववेदं च साक्षात्कृत्य संस्कृतभाषायांस्तान् अलिखन्।

विश्वस्य सर्वोत्तमाः आध्यात्मिकज्ञानस्तम्भाः उपनिषदोऽपि संस्कृतभाषायाः महत्त्वं प्रकटयन्ति। शिक्षा, व्याकरणं, कल्पः, निरुक्तं, छन्दःशास्त्रं, ज्योतिषञ्चेति षड् वेदाङ्गानि संस्कृतस्य महत्त्वं तन्वन्ति।

आदिकविना वाल्मीकिना विरचितं रामायणम् महाकाव्यम्, वेदव्यासप्रणीतं महाभारतं पुराणानि च संस्कृतभाषायाः महिमानं प्रकटयन्ति। पाणिनेः व्याकरणरचना अष्टाध्यायी, पतञ्जलेर्महाभाष्यं षड्दर्शनशास्त्राणि, नाट्यशास्त्रं, सङ्गीतशास्त्रं, विविधानि सूत्राणि, विविधाः स्मृतिग्रन्थाश्च संस्कृतभाषामलङ्कुर्वन्ति।

संस्कृतकवितायाः हासः महाकविर्भासः, सुरभारतीविलासः कविकुलगुरुः कालिदासः, बुद्धगुणगायको महाकविरश्वघोषः, भारविः, माघः, श्रीहर्षः, तथा चान्ये परश्शताः महाकवयः स्वकीयाभिः रसपेशलाभिः कृतिभिः संस्कृतभाषायाः कोषं पूरयामासुः।

सुबन्धुः, दण्डी, बाणभट्टः, आम्बिकादत्तव्यासादयः स्वकीयैः गद्यग्रन्थैः संस्कृतभाषायाः गद्यसाहित्यम् अपूरयन्। चरक-सुश्रुत-ग्रंथेषु चिकित्साशास्त्रस्य समग्रं ज्ञानं संस्कृतभाषायां विलसति।

संस्कृतभाषा भारतम् एकतासूत्रे निबध्नाति। भारतराष्ट्रस्य सर्वेषु प्रान्तेषु संस्कृतभाषायाः अध्ययनम् अध्यापनं च अजस्ररूपेण विधीयते। अस्माकं संस्कृतिः मूलरूपेण अस्यामेव भाषायां सुरक्षितास्ति। अस्माकं सर्वे धार्मिकाः संस्काराः वेदानां मन्त्रोच्चारपुरःसरं सम्पाद्यन्ते।

भारतराष्ट्रे याः याः प्रान्तीयाः भाषाः सन्ति, ताः सर्वाः संस्कृतभाषातो विनिःसृताः। संस्कृतभाषायाः अपभ्रंशा एव प्रान्तीयभाषाः। अतः इदं सुव्यक्तं यत् सर्वासां भाषाणां मूले संस्कृतभाषा तिष्ठति।

प्राचीनकाले संस्कृतभाषा तथैव राष्ट्रभाषा आसीत् विद्वांसः संस्कृतभाषयैव भाषन्ते स्म। संस्कृतज्ञानविमुखाश्च अपभ्रंशमाश्रित्य वदन्ति स्म।

केचित् संस्कृतज्ञान-पराङ्मुखाः 'संस्कृतभाषा मृता' इति समुद्घोषयन्ति। संस्कृतभाषा मृतेति कथनेन वस्तुतस्ते आत्मनो विवेकशून्यतामेव प्रकटयन्ति, कुतश्चिच्छ्रुतं शुकवच्छ्रावयन्ति।

संसारे प्रभूताः भाषाः समुत्पन्नाः! कालक्रमेण विनष्टाश्च। परन्तु इयं संस्कृतभाषायाः सञ्जीविनी शक्तिः, यदियं सततम् उपेक्षां सहमानापि अद्यापि न केवलं जीवति, अपि तु स्वशब्दराशिना बह्वीनां स्वाङ्गजातानां भाषाणां प्राणपोषणं करोति। भारतभवाः सर्वाः भाषाः भारतीया संस्कृतिश्च सर्वप्रकारेण संस्कृतभाषाम् उपजीवन्ति।

संस्कृतभाषाया महिम्नो विषये न केवलं वयं भारतीया एव, अपि तु मैक्समूलर-गेटेप्रभृतयो वैदेशिका विद्वांसोऽपि कृतज्ञतया नतमस्तकाः सन्ति। यः कोऽपि संस्कृतभाषामधीत्य संस्कृतग्रन्थराशेः परिशीलनं करोति, स एव अमृतपूरस्नातः इव आत्मानं धन्यं कलयति।

कस्यचिद् वैदेशिकस्य अधस्तना उक्ति स्मर्तव्याः—

यावद् भारतवर्षं स्याद् यावद्विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम्॥

संस्कृतस्य एतादृशं महत्त्वं ज्ञात्वैव विदेशीयेषु विश्वविद्यालयेषु संस्कृतभाषायाः अध्ययनाय अनुशीलनाय च पृथग् विभागाः विद्यन्ते। जर्मनदेशेषु संस्कृतभाषाया अध्ययनम् अध्यापनं च बाहुल्येन दृश्यते। तत्र आकाशवाण्यामपि संस्कृतभाषायै स्थानं सम्प्रदत्तम्।

संस्कृतभाषा आध्यात्मिकज्ञानस्य तु भाण्डागार एव। आत्मकल्याणचिन्तनं यादृशम् अस्यां भाषायां सुरक्षितम् उपलभ्यते, न तादृशम् अन्यासु भाषासु।

संस्कृते लौकिकविषयाणामपि उपेक्षा नास्ति। अर्थशास्त्रस्य, राजनीतेः, युद्धकलायाः, कूटनीतेः, कामशास्त्रस्य लौकिकानाम् आख्यानका-

नाम्, परिहासकथानां, सङ्गीतस्य, नृत्यस्य, एवमन्येषां प्रचुराणां लौकिकविषयाणाम् उपनिबन्धकाः भूयांसो ग्रन्थाः उपलभ्यन्ते ।

संस्कृतभाषा देवभाषेति पदेनापि अलंक्रियते। केचिद् अविद्वांसः संस्कृतनिन्दकाः आक्षिपन्ति यद् या खलु देवानां भाषा तया मनुष्याणां कः लाभः जायेत ? अत्रेदं ध्येयं यद् 'देवा वै विद्वांसः' इत्यादिना देवपदेन विदुषां ग्रहणं भवति । अतः अत्र न काचिद् विप्रतिपत्तिः । आचार्यदण्डिनः अधोलिखिता उक्तिः संस्कृतं देववाणीपदं प्रतिष्ठापयति—

"संस्कृतं नाम दैवी वाग् अन्वाख्याता महर्षिभिः ।

संस्कृतभाषायामधुनापि प्रतिवर्षं बहु साहित्यं रच्यते विद्वद्भिः। अमरवाणीयं स्वकीयाभिः विशेषताभिरेव अद्यापि अध्येतॄणां मनांसि मोहयन्ती स्वकीयाम् अमरतां प्रथयति। 'सरस्वती श्रुतिमहती महीयताम्' इत्यस्मिन् स्वरेऽस्मदीयं स्वरं मेलयन्तो वयं सततं संस्कृतभाषायाः विकासं कामयामहे ।

—:o:—

वाग्भूषणं भूषणम्

भूष्यतेऽनेनेति भूषणम् । आभूषणं, विभूषणम्, अलङ्कारः, अलङ्करणम् इत्यपराणि भूषणस्य नामानि । मानवजातिः स्वभावतो भूषणप्रिया वर्तते। सर्वे मनुष्याः यथाविभवं भूषणानि धारयन्ति। नारीणां कृते कतिचिद् आभूषणानि अनिवार्यरूपेण धारणीयानि भवन्ति। अन्यथा तासां वेशोऽमाङ्गलिकं मन्यते समाजे। विभूषणान्यपि बहुविधानि प्रकल्पितानि। यथा पुष्पाणां भूषणानि, आयसानि भूषणानि, राजतानि भूषणानि, स्वर्णनिर्मितानि भूषणानि, रत्नजटितानि भूषणानि। केयूराः, अङ्गदाः, हाराः, चूडामणयः, कुण्डलानि, मेखलादाम, नूपुराः, एतदतिरिक्तानि भूषणानां बहूनि प्रकाराणि सन्ति। परन्तु एतानि सर्वाण्या-

भरणानि सुसंस्कृता वाग् अतिशेते। सुसंस्कृतायाः वाचोऽभावे एतानि विभूषणानि व्यर्थप्रायाणि भवन्ति। एतेषाम् उपरिवर्णितानामाभूषणानामभावेऽपि वाग्भूषणसंयुक्तो मानवः समाजे बहु सुशोभते। यथोक्तम् नीतिशतके—**केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः।**

न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः॥
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

वाग्भूषणस्य इदं सर्वोत्कृष्टं वैशिष्ट्यं यदिदम् आभूषणं सततं प्रयुज्यमानमपि क्षैण्यं न प्रयाति। अन्यानि भूषणानि सततप्रयोगेण शनैः शनैः क्षीणतां भजन्ते, परन्तु वाग्भूषणं यथा यथा प्रयुज्यते, तथा तथा अस्य मात्रा संवर्धते एव।

वाग्भूषणं शब्दमयं भवति। एकस्यापि शब्दस्य सुप्रयोगो लोके परलोके च कामानां संदोहनं करोति। यथोक्तं पातञ्जलभाष्ये—

'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।'

शोभनवस्त्र-मण्डितः मेचक-कुञ्चित-चिकुरसुशोभितः सुवर्ण-भास्वरालङ्कारभूषितोऽपि मानवो वाग्भूषणं विना शोचनीयां दशां गच्छति। 'मनसि सप्त शल्यानि मे' इति प्रतिपादयता केनचित् कविना 'मुखमनक्षरं स्वाकृतेः' शल्यवत्कष्टकरम् इति सम्यगेव उक्तम्। तद् यथा—

शशी दिवसधूसरो गलितयौवना कामिनी।
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः॥
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो।
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे॥

बहुविधविभूषितोऽपि सुव्यक्तित्वयुक्तोऽपि जनो विदुषां समाजे तावदेव राजते यावत् किमपि न भाषते। यदा च भाषते तदा तस्य मौर्ख्यं प्रकाशितं संजायते। ततः स तिरस्कारविषयो भवति। यथा काकः पिकश्च समानरूपेण कृष्णौवर्ण स्तः। अतस्तयोर्मध्येऽन्येषु ऋतुषु कोऽपि भेदो न लक्ष्यते, किन्तु यदा ऋतुराजो वसन्तो विजृम्भते, यस्मिन्

ऋतौ पिकोऽपि मुखरितो भवति, तदा समानवर्णयोः काक-पिकयोः भेदं सर्वे जनाः विजानन्ति । सुविचार्यं निगदितम् अन्योक्तिविलासे—

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥

वाग्भूषणस्य महान् महिमा । मानवस्य प्रगतेः इतिहासे वाचोऽतिशयं महत्त्वम् । वाङ्माध्यमेन अस्माकं पूर्वजानामनुभवाः, उपदेशाः, विविधज्ञानानि, विज्ञानानि, अद्यावधि सुरक्षितानि सन्ति । इदं वाग्वैशिष्ट्यं पशुषु, पक्षिषु, अन्येषु च जीवेषु नास्ति । अत एव ते कञ्चिदपि प्रगतिं कर्तुं न प्रबभूवुः ।

सूनृतया वाचा मानवः सर्वेषां हृदयहारो भवति । वाग्भूषणभूषिताः वैदिकाः ऋषयः तथा च वाल्मीकि-व्यास-भास-कालिदास-भारवि-माघ बाणभट्ट-श्रीहर्ष-जयदेवप्रभृतयो महाकवयः सुरभारतीं भूषयामासुः । वाक्संयमेन शाप-वरदानयोः अपूर्वा शक्तिः प्रादुर्भवति । वाचः समुचितेन प्रयोगेण मानवोऽपरिचितान् क्षणेन आत्मीयान् करोति । वाचः समुचितेन प्रयोगेण मनुष्यः सर्वेषां लोचनतारकवत् संजायते । संगीते खलु वाग्भूषणस्य भूषणत्वं सर्वाधिकं सार्थकत्वं लभते ।

मानवेतरजातयोऽपि वाङ्महिम्ना सुपूजिताः भवन्ति । राघवदूतस्य हनूमतः सुसंस्कृतां वाचं श्रुत्वा रावणोऽतीव प्रभावितः आसीत् । नलोपाख्याने हंससमुदीरितां वाचं श्रुत्वा नलः दमयन्ती च अत्यन्तं प्रभावितौ बभूवतुः । एतैः निदर्शनैः सिद्धमिदं यद् वागेव त्रिलोक्यां सर्वोत्कृष्टं भूषणं वर्तते । अतएव "वाग्भूषणं भूषणम्" इति कथयिता कविः वस्तुतः तथ्यं प्रतिपादितवान् ।

—: ० :—

राष्ट्रपिता महात्मा गान्धी

श्रीगान्धिमहाभागस्य जन्म १८६९ तमे ईसवीयवर्षे अक्टूबरमासस्य द्वितीये दिनाङ्के गुजरातप्रदेशान्तर्गते काठियावाडराज्यस्य पोरबन्दर-नामके नगरेऽभवत् । अस्य पितुः नामधेयं कर्मचन्द गान्धी आसीत् मातुश्च नाम पुतलीबाई असीत् । अस्य स्वकीयम् अभिधानं मोहनदासः आसीत् । अयं बाल्यकालादेव सत्यवादी, विनम्रः, माता-पित्रोः सेवकः, ईश्वरभक्त-श्च आसीत् । अस्य प्राथमिकी शिक्षा पोरबन्दरे एव अभवत् । ततः पश्चाद् गान्धिनः पितुः नियुक्तिः राजकोटनगरे मन्त्रिपदे सञ्जाता । अतोऽस्य माध्यमिकी शिक्षा राजकोटनगरेऽभवत् । यदा श्रीगान्धी स्वायुषो द्वादशं वर्षम् अतिक्रान्तवान् तदैवास्य विवाहः कस्तूरबा-देव्या सह अभूत् ।

श्रीगान्धी स्ववयसः सप्तदशे वर्षे प्रवेशिकापरीक्षाम् उत्तीर्य विधि-शास्त्रस्य अध्ययनाय आङ्ग्लदेशं गतवान् । तत्र सदाचारनिरतः त्रिभिः वर्षैः बैरिस्टरपदवीं लब्ध्वा भारतं प्रत्यागच्छत् । ततः परं स व्यवहार-विद्यां (वाक्कीलवृत्तिम्) उपजीवितुं मुम्बापुरीम् अध्युवास । ततः परं कस्यचिद् व्यापारिणो व्यवहारप्रसङ्गेन दक्षिण-अफ्रीकादेशं १८९३ तमे ईसवीयाब्दे गतवान् । तत्रैव तस्य महात्मत्वस्य गुणाः विकासं प्राप्तवन्तः । दक्षिण-अफ्रीकादेशे स भारतीयमूलानां जनानां दुर्दशामवलोक्य अतीव ग्लानिम् अनुभूतवान् । अतः स तत्र भारतीयानां - महासभां स्थापयित्वा तन्माध्यमेन गौराङ्गैः कृतानाम् अत्याचाराणां प्रतीकाराय प्रायतत । अस्मिन् प्रसङ्गे स गौराङ्गैः प्रताडितोऽपि सत्याग्रहान्दोलनेन तत्रत्यान् प्रशासकान् प्रकम्पयामास । दक्षिण-अफ्रीकानिवासिनां भारतीयानां जीवनं सम्मान-समायुक्तं विधाय महात्मा गान्धी १९१५ तमे ईसवीयवत्सरे भारतं प्रत्यागच्छत् ।

दक्षिण-अफ्रीकातः भारतम् आगत्य श्रीगान्धी भारतस्य भ्रमणं कृत्वा अत्रत्यानां समस्यानाम् अध्ययनम् अकरोत्। ततः परम् अहमदाबाद-नगरस्य समीपे साबरमती-नदीतटे सत्याग्रहाश्रमस्य स्थापनां कृतवान्।

प्रथममहायुद्धे भारतीयाः गौराङ्गानाम् महत् साहाय्यं कृतवन्तः। परन्तु एतत् सर्वं विस्मृत्य ते भारतवर्षे रौलटनामधेयं विधानं स्थापितवन्तः यस्य माध्यमेन कोऽपि जनः कारणम् अनुक्त्वैव कारागारे प्रेषयितुं शक्यते स्म। महात्मा गान्धी तस्य विधानस्य प्रतीकाराय सविनयान्दोलनस्य प्रवर्तनं कृतवान्।

अस्याः घटनायाः पश्चात् स्वसहयोगिभिः समं श्रीगान्धी स्वराज्य-प्राप्तिमेव भारतीयानां कृते परमं लक्ष्यम् इति स्वीकृतवान्। अस्य च लक्ष्यस्य प्राप्तये असहयोगान्दोलनस्य मार्गं निर्धारितवान्। इदं लक्ष्यं १९२० ईसवीये नागपुरे भारतीयमहासभायाः अधिवेशने स्वीकृतम्। तस्मिन्नेव अधिवेशने स्वदेशनिर्मितानां वस्तूनां प्रयोगः, विदेश-विनिर्मितानां वस्तूनां परित्यागः उपलब्धानां पदवीनाम् परित्यागः गौराङ्गानां भारतागतस्य युवराजस्य स्वागतस्य बहिष्कारश्च निर्धारिताः आसन्।

१९३०तमे वर्षे महात्मागान्धी लवणसत्याग्रहं मद्यनिषेधं च प्रारभत। अत एव स पुनः कारागारे निरुद्धः शीघ्रमेव मुक्तश्च। आङ्ग्लैः लवणनिर्माणं स्वोपयोगार्थम् अनिषिद्धं घोषितम्! अयं निर्णयः वायसराय इरविनसन्धिनाम्ना प्रसिद्धोऽस्ति। अतः परं श्रीगान्धी गोलमेज-सम्मेलने सम्मिलितुम् आङ्ग्लदेशं गतः। आङ्ग्लदेशाद् असन्तुष्टः एव प्रतिनिवृत्तः। ततः आगत्य स गौराङ्गानां हिन्दुभ्यः अस्पृश्याणां (शूद्राणां) हरिजनानां पृथक्करणप्रयासस्य विरुद्धं कार्यम् अकरोत्। तेषां हरिजनानां कल्याणाय हरिजनसंघं स्थापितवान्। अस्पृश्यता-निवारणाय एकविंशतिदिवसानाम् अनाहारं कृतवान्।

१९४२तमे ईसवीयाब्दे द्वितीय-विश्वयुद्धस्य परिसमाप्तौ "आङ्ग्लाः भारतादपसरत" इत्युद्घोषः सर्वसम्मत्या स्वीकृतः। एतेन महात्मा

गान्धी अन्यैः प्रमुखैः नेतृभिःसार्धं कारागारे निक्षिप्तः। एतस्मिन्नेव समये श्रीगान्धिनः पत्नी दिवङ्गता।

अन्ततः १९४७ तमे ईसवीयवर्षे आङ्ग्लशासकैः भारतस्य स्वतन्त्रता-सिद्धान्तः स्वीकृतः, किन्तु भारत-पाकिस्तानरूपेण भारतस्य विभाजने सति भयङ्करः हिन्दु-मुस्लिमयोः रक्तपातः सञ्जातः। महात्मा गान्धी एतेन रक्तपातेन अतीव दुःखी अभूत्। एतस्मिन् समये श्रीगान्धी बङ्गप्रान्तस्य नोवाखालीप्रदेशे आसीत्।

१९४८ तमे ईसवीयाब्दे जनवरी-मासस्य त्रिंशे दिनाङ्के महात्मा गान्धी नाथूरामगोडसेद्वारा पिष्टलगुलिकाप्रहारेण प्रहृतः। हे राम! इति कथयन् महात्मा गान्धी पाञ्चभौतिकं शरीरं तत्याज। परन्तु अद्यापि स यशःशरीरेण अस्मान् प्रेरयन् जगति विद्यमानो वर्तते। सत्याय अहिंसायै च स आजीवनं प्रायतत। श्रीगान्धी निजेन त्यागमयेन आदर्शेन 'महात्मा' इति कथ्यते। राष्ट्रस्य निर्माणात् 'राष्ट्रपिता' इति 'बापू' इति चोच्यते। महात्मनो गान्धिनः आदर्शाः मानवतायाः पूर्ण-विकासाय अनुकरणीयाः सन्ति।

—:o:—

रम्या रामायणी कथा

अथवा

आदिकविः वाल्मीकिः

आदिकविः महर्षिः वाल्मीकिः यां रामकथां स्वकीये आदिकाव्ये रामायणे वर्णितवान् सा कथा ततः प्रभृति इदानीमपि सहृदयानां मान-सानि स्पृशन्ती तत्र लोकोत्तरं अनुभवैकगम्यं प्रभावं निक्षिपति यद्वशीभूतो ःजन रामायणकथायाः हृद्यतां हृदयेन भावयन् प्रसङ्गतः शब्दैः प्रकट-

यत्येव। तस्यामेव परम्परायां नलचम्पूकाव्यस्य रचयिता श्रीत्रिविक्रमभट्ट आदिकवये वाल्मीकये स्वां प्रणतिं समपर्यन् वाल्मीकिप्रणीतरामायणकथायाः संक्षेपेण समालोचनां प्रस्तुतवान्—

सदूषणापि निर्दोषा सखरापि सुकोमला।
नमस्तस्मै कृता येन रम्या रामायणी कथा॥

रामायणस्य रमणीयता नैकरूपा। तस्य रमणीयता वस्तुरूपा, रसरूपा, अलंकाररूपा, नीति-निरूपणरूपा प्रकृत्यादिस्वरूपवर्णनरूपेति बहुविधा विद्यते। रामायणगताः लोकसिद्धाः वार्ताः कस्य मानसं न मोहयन्ति। कौशल्यासुमित्रासीतानसूयानां शीलं सौजन्यं पातिव्रत्यं च कस्य मनसि औदात्यं न निदधाति ?

शवर्याः प्रेममयी तपश्चर्या कस्य न स्पृहणीया ? दशरथस्य सत्यसन्धत्वं, रामस्य पितृवचननिरतत्वं, भरतस्य शीलसौजन्ये, लक्ष्मणस्य लोकोत्तरा भ्रातृसेवा, हनूमतः स्वबलाभिमानरहितः स्वभावः निष्कामा स्वामिसेवा चेति रामायणे वाणीकलेवरं दधानाः सर्वान् सहृदयजनान् समाह्लादयन्ति।

मर्यादापुरुषोत्तमस्य गुणगणानां मध्ये तस्य कृतज्ञतायाः एकं निदर्शनं अभिरामतमं वर्तते। राक्षसराजेन हृतायाः सीतायाः प्रवृत्तिम् अधिगत्य लङ्कातः प्रतिनिवृत्तस्य हनूमतः समक्षं रामः स्वकृतज्ञतां प्रकटयति सुन्दरकाण्डे—

मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे।
जनः प्रत्युपकारार्थी विपत्तिमभिकांक्षति॥

रामायणस्य प्रारम्भः करुणातः समभवत्। तस्यमध्ये विविधानां रसानां परिपाकः चकास्ति। प्रजापालनस्य लोकोत्तरं निदर्शनं प्रतिष्ठापयितुं सीतां निर्वासयतः रामस्य चरमं जीवनं करुणाप्लुतं समजनि। रामस्य कृते कुशलवयोः स्वात्मजयोः वात्सल्यमयम् अवलोकनमपि सीतां विना करुणाप्लुतं वर्तते। सुदीर्घकालं यावद् रामः हृदयगतं शोकं प्रच्छादयन् राज्ञः प्रजापालनकर्तव्यं निरवाहयत्। किमिदं न लोकोत्तरम् ?

रामायणेऽन्येपि शतशः अभिरामाः प्रसङ्गाः सन्ति येषामुल्लेखो विस्तरभयादिह न क्रियते ।

महर्षिः वाल्मीकिः रामायणस्य रमणीयतापक्षं स्वयं जानाति स्म । अतस्तेन बालकाण्डे (२।३६) उक्तम्—

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥

रामायणम् आदिकाव्यं वर्तते इत्यपि वाल्मीकिः स्वयमुद्घुष्टवान्—

आदिकाव्यमिदं चार्षं स्वयं वाल्मीकिना कृतम् ।

रामायणकथायाः आकलनं कुर्वन् भोजराजः स्त्रीये रामायणचम्पूकाव्ये (१।८) प्रोक्तवान्—

'मधुमयभणितीनां मार्गदर्शी महर्षिः ।'

रामायणकथाम् आस्वादयतः कस्यचित् कवेः इयमुक्तिः याथार्थ्यम् आवहति—

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकि-कोकिलम् ॥

इत्थं रामायणकथायाः वैशिष्ट्यं परिभाव्य त्रिविक्रमभट्टस्य 'रम्या रामायणी कथा' इति अभिव्यक्तेः सार्थक्य-विषये सन्देहलेशोऽपि नास्ति ।

—:०:—

प्रेयान् कविः

(महाकविः कालिदासः)

कविकुलगुरुः महाकविः कालिदासः स्वविषये किमपि न निर्दिष्टवान् । विद्वांसःकालिदासस्य स्थितिकालम् ईसवीयपूर्वप्रथमशताब्दीतःषष्ठशताब्दीपर्यन्तं विभिन्नसमयेषु समर्थयन्ति । भारतीयपरम्परानुसारिणो विद्वांसः

कालिदासं 'शकारिः' इत्युपाधिविभूषितस्य उज्जयिनीनरेशस्य विक्रमादित्यस्य नवरत्नेषु समर्थयन्ति ।

षष्ठशताब्दीतः पश्चात् कालिदासस्य स्थितेः कल्पना व्यर्थप्रलपितमेव । यतो हि महाकविबाणभट्टस्य स्थितिकालः सप्तमशताब्द्याः पूर्वार्धः सुनिश्चितः एव । स हि हर्षवर्धनस्य सभामलङ्कृतवान् । स्थाण्वीश्वरसम्राजो हर्षवर्धनस्य स्थितिकालः ६०६ ईसवीयवर्षमारभ्य ६४८ ईसवीयाब्दपर्यन्तं वर्तते । महाकविः बाणभट्टो हर्षचरिते तत्पूर्वं जातानां लब्धप्रतिष्ठानां कवीनां स्मरणं कुर्वन् कालिदासस्य काव्यमाधुर्यं प्रशंसितवान् । यथा—

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥

एवं हि ईसवीयप्रथमशताब्दीतः आरभ्य षष्ठशतकस्य मध्ये एव क्वचित् कालिदास्य स्थितकालेन भाव्यम् । समधिकाः विद्वांसः 'सः ईसवीयपूर्वप्रथमशतके एव वर्तते' इति मन्यन्ते ।

यथा कविकुलगुरोः कालिदासस्य समयस्य सुनिश्चयो नास्ति तथैव महाकविः भारतस्य कस्मिन् प्रदेशे समुत्पन्नः इत्यपि सुनिश्चितो नास्ति । केचित् तं पर्वतीयं, केचिद् बङ्गजातं, केचित् केरलीयं, केचिच्च तस्य उज्जयिनीं प्रति पक्षपातात् तम् उज्जयिनीनिवासिनं समर्थयन्ति ।

महाकविः कालिदासो निम्नलिखितानि काव्यनाटकानि विनिर्माय सुरभारती-भण्डारं विभूषयामास—

१–रघुवंशम् (महाकाव्यम्) । २–कुमारसम्भवम् (महाकाव्यम्) । ३–मेघदूतम् (खण्डकाव्यम्) । ४–मालविकाग्निमित्रम् (नाटकम्) । ५–विक्रमोर्वशीयम् (नाटकम्) । ६–अभिज्ञानशाकुन्तलम् (नाटकम्) । ७–ऋतुसंहारः (ऋतुवर्णनपरं काव्यम्) ।

कालिदासस्य अपरम् अभिधानं 'दीपशिखा' इति वर्तते । रघुवंशमहाकाव्ये इन्दुमतीस्वयंवरे रात्रौ दीपशिखेव संचरन्ती इन्दुमती यं यं नृपं विहाय अग्रगामिनी बभूव स स नरेन्द्रो वैवर्ण्यम् अगच्छत् ।

स्वयंवरे वरमालां दधानायाः इन्दुमत्याः संचारिण्या दीपशिखया सह उपमितत्वात्, उपमायाः अतिशयभव्यत्वाच्च विद्वांसः कालिदासं 'दीपशिखा' इत्युपाधिना भूषयामासुः । तत् पद्यं यथा—

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥

कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः महाकविरस्ति । तस्य कृतिषु सर्वत्रैव भारतीयसंस्कृतिः लब्धस्थाना दृश्यते । कालिदासस्य रचनासु वैदर्भीरीतिः विराजते । सरलं सुबोधगम्यं तस्य कवित्वं कस्य मनो न मोहयति । संस्कृतसाहित्ये सन्त्यन्येऽपि बहवो महाकवयः । ते सर्वे एव पाण्डित्यप्रदर्शने संलग्नाः सन्ति । परन्तु कालिदासस्य रचनासु क्वचिदपि तादृशः प्रसङ्गो नास्ति यत्र कविः स्वोत्कर्षप्रदर्शनपरः दृष्टिपथम् अवतरेत् ।

कालिदासो यस्यैव विषयस्य वर्णनं करोति तस्य बिम्बं सरलया पदावल्या सम्मुखीनं विदधाति । स खलु कस्मिन्नवसरे कीदृशी पदावली व्यवहर्तव्या इत्यस्मिन् विषये परमनिष्णातः । तस्य कृतयोऽलंकाराणां भारेण भारवत्यो न सन्ति । स हि अलङ्काराणां छन्दसां च चयने परमविदग्धः । उपमालङ्कारस्य समुचितप्रयोगे निरुपमः ।

कालिदासकृतम् अभिज्ञानशाकुन्तलं समस्ते खलु विश्वे प्रसिद्धिमधिगतं विद्यते । अधस्तना तद्विषयिका प्रशस्तिः स्मरणीया:—

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्रश्लोकचतुष्टयम् ॥

न केवलं भारतीयाः एव, अपि तु पाश्चात्त्याः समीक्षकाः अपि अभिज्ञानशाकुन्तलस्य अभिरामतां मुक्तकण्ठेन स्वीकुर्वन्ति । जर्मनसमीक्षकस्य गेटेमहाभागस्य अभिज्ञानशाकुन्तलविषयकः उद्गारो द्रष्टव्यः, यस्य संस्कृतस्वरूपं निम्नलिखिते पद्ये वर्तते—

वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यत् ।
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम् ॥

एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः ।
ऐश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम् ॥

एवं हि अस्माकं प्रेयान् कविः महाकविः कालिदासः स्वकृतिभिः न केवलं सुरभारतीसाहित्यम्, अपि तु समग्रं विश्वसाहित्यं विभूषितवान् । यतो हि महाकवेः सर्वासां रचनानामनुवादो विश्वस्य नैकासु विविधासु भाषासु कृतो विद्यते ।

—:०:—

उपमा कालिदासस्य

संस्कृतवाङ्मये कालिदासः रसपेशलो महाकविः वर्तते । भारतीयायाः संस्कृतेः औचित्यं तस्य कवित्वस्य परमं वैशिष्ट्यमस्ति । सारल्यं तस्य, कवितायाः आभूषणम् । कस्मिन् समये कीदृशी पदावली प्रयोक्तव्या, कदा कतमत् छन्दः समाश्रयणीयं, कदा कतमोऽलङ्कारो गुणो वा अङ्गीकरणीयः इत्यस्मिन् विषये महाकविः कालिदासः परमनिष्णातः । अत एव परवर्ति-समये काव्यज्ञैः "कविकुलगुरुः" "कविता-कामिनी-विलासः" इत्युपाधिभ्यां महाकविः विभूषितः ।

बहुविधविशेषतान्वितोऽपि कालिदासः उपमालङ्कारस्य प्रयोगेऽद्वितीयः । उपमालङ्कारस्य माध्यमेन महाकविः स्वाभाविकता-समायुक्तानां बिम्बानाम् उद्भावनेऽतीव निपुणः । अतः सर्वैः संस्कृतसाहित्यमर्मज्ञैः एकस्वरेण "उपमा कालिदास्य" इति तस्य प्रसिद्धिः स्वीकृता । अस्याः सूक्तेः समर्थकानि शतशः उदाहरणानि कालिदासस्य कृतिषु विलसन्ति ।

रघुवंशमहाकाव्ये मङ्गलाचरणश्लोके पार्वती-परमेश्वरयोः वागर्थाभ्यां सार्धम् उपमा, तयोः सायुज्यस्य भव्यम् उदाहरणं वर्तते ।

यथा — वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

वैवस्वतो मनुः राज्ञां प्रथमः राजा तथैव आसीत् यथा छन्दसां मध्ये ओङ्कारः—

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥

दिलीपस्य कृते गुरोः वशिष्ठस्य उपमा-माध्यमेन नन्दिनीसेवाप्रकार-निर्देशः "विद्यामभ्यसनेनेव प्रसादयितुमर्हसि" कियद् भव्यं विद्यते ।

दिलीपस्य गोसेवा-प्रकरणे उपमायाः अतिशय-चित्ताकर्षकाणि उदाहरणानि सुशोभन्ते । दिलीपो नन्दिन्याः सेवायै तच्छायेव तस्याः अनुसरणं कृतवान् इत्यस्य अभिरामम् उदाहरणम् अवलोक्यताम्—

स्थितः स्थितामुच्चलितः प्रयातां, निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां, छायेव तां भूपतिरन्वगच्छत् ॥

मुनिहोमधेनुः नन्दिनी स्वसेवकेन दिलीपेन अनुवर्त्तमाना वनान्तात् प्रतिनिवर्त्तते, इतश्च राज्ञी सुदक्षिणा आश्रमद्वारि नन्दिन्याः प्रत्युद्गमनं करोति । तदानीं तयोः सुदक्षिणा-दिलीपयोः मध्ये धेनुः तथैव शोभते यथा निशा-दिवसयोः मध्ये सन्ध्या विराजते—

पुरस्कृता वर्त्मनि पार्थिवेन,
प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुः,
दिनक्षपामध्यगतेव सन्ध्या ॥

इन्दुमती-स्वयंवरे वरमालां हस्तेन दधाना सञ्चारिणी दीपशिखा-सन्निभा इन्दुमती यं यं राजानं व्यतीयाय स स राजा नरेन्द्रमार्गाट्ट इव विवर्णोऽभवत् । उपमायाः इदं तदुदाहरणं येन कालिदासः "दीपशिखा" इत्युपाधिं लब्धवान् । यथा —

सञ्चारिणी दीपशिखेव रात्रौ,
यं यं व्यतीयाय पतिंवरा सा ।

नरेन्द्रमार्गाट्ट इव प्रपेदे,
विवर्णभावं स स भूमिपालः ॥

कुमारसम्भवस्यापि प्रारम्भं कालिदासः उपमामयेन पद्येन कृतवान्। भारतस्य उत्तरस्यां दिशि विराजमानः पर्वतराजो हिमालयः पृथिव्याः मानदण्डः इव विभाति—

अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य,
स्थितः पृथिव्या इव मानदण्डः ॥

शिवप्राप्तये तपस्यन्ती पार्वती छद्म-ब्रह्मचारी-वेशधारिणा शिवेन कृतां शिवनिन्दां सोढुम् अशक्ता प्रकुपिता तस्मात् प्रदेशात् अपससार। तदानीं तस्याः प्रेमपरीक्षां कुर्वाणो ब्रह्मचारिवेशधारी शिवः स्वकीयं वास्तविकं रूपमाश्रित्य पार्वत्याः सम्मुखे तस्थौ। तदा पार्वती कीदृशीम् उपमां जगामेत्यवलोक्यताम्—

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः,
निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः,
शैलाधिराजतनया न ययौ न तस्थौ ॥

मेघदूते शिप्रासरित्संपर्कशीतलः पवनः प्रार्थनाचाटुकारः प्रियतम इव प्रतिभाति—

"शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।"

अभिज्ञानशाकुन्तले शकुन्तलाशोभावर्णनगता मालोपमा प्रकामम् अभिरामा—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधुनवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं,
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

राजा दुष्यन्तः कश्यपाश्रमगतं स्वपुत्रम् अजानन् चपलकर्मभ्यो वारयन् उपमामाश्रित्य वक्ति —

एवमाश्रमविरुद्धवृत्तिना,
संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दुष्यते,
कृष्णसर्पशिशुनेव चन्दनम् ॥

एवं महाकवि-कालिदासस्य कृतिषु भव्यानाम् उपमानां प्रयोगस्य प्राचुर्यात् "उपमा कालिदासस्य" इति कथनम् अतीव तात्त्विकं प्रतिभाति ।

—:०:—

काव्येषु नाटकं रम्यम्

काव्यं हि आपातरमणीयं भवति । काव्यं च श्रव्य-दृश्यभेदेन द्विविधं परिगणितम् । श्रव्यकाव्यस्य महाकाव्य-खण्डकाव्य-कथाख्यायिकादयो भेदाः भवन्ति । दृश्यकाव्यस्य नाटक-प्रकरण-भाण-डिम-व्यायोगादयो दश नाट्यभेदाः परिगण्यन्ते । ते च दशभेदाः दृश्यकाव्यस्य अङ्गत्वेन रूपकाणि इत्युच्यन्ते । यथोक्तं दशरूपके—

नाटकमथप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥

दशस्वपि रूपकेषु नाटकं विकसिततमोः नाट्यभेदोऽस्ति । श्रूयते पुरा किल प्रजापतिः सर्वेषां वर्णानां कल्याणाय, सरसतया च 'रामादिवत् प्रवर्तितव्यं न रावणादिवत्' इत्युपदेष्टुं चतुर्भ्यो वेदेभ्यः सारं संगृह्य नाट्यवेदं निर्मितवान् । यथोक्तं भरतमुनिना नाट्यशास्त्रे—

जग्राह पाठमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥

यथा श्रुतस्य घटनाक्रमस्य अपेक्षया दृष्टो घटनाक्रमः समधिकमहत्त्वशाली भवति, तथैव श्रव्यकाव्यापेक्षया दृश्यकाव्यम् अधिकं हृदयग्राहि भवति। एतदतिरिक्तं श्रव्यकाव्ये कविरेव सर्वेषां पात्राणां संवादं प्रस्तौति। दृश्यकाव्ये तु पात्राणि स्वयमेव सम्मुखमागत्य स्वं स्वं पक्षं प्रस्तुवन्ति। नाटके (नाट्ये) सर्वेषां ज्ञानानां, शिल्पानां, योगानां कर्मणां, सर्वासां विद्यानां कलानां च उपयोगो भवति। यथोक्तं नाट्यशास्त्रे—

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥

नाट्ये विविधानां ज्ञानानां, शिल्पानां, कलानाम् उपयोगद्वारा सर्वसामान्यस्य कृते मधुरौषधसन्निभः कर्तव्योपदेशः क्रियते। नाट्यं खलु दुःखितानां श्रमार्तानां शोकार्तानां च जनानां कृते परमं विश्रामदायकम् अस्ति। यथोक्तं नाट्यशास्त्रे—

दुःखार्तानां श्रमार्तानां शोकार्तानां तथैव च।
विश्रान्तिजननं लोके नाट्यमेतद् भविष्यति॥

नाटके शृङ्गार-वीर-हास्यादीनां परिपाकेन सामाजिकानां स्वस्थं मनोरञ्जनं सम्पाद्यते। रसपेशलस्य मनोरञ्जनस्य च माध्यमेन नाटकाभिनयद्वारा यथावसरं धर्मादीनां वेदविद्यानां सदाचारस्य च शिक्षणं क्रियते। सज्जनानां दुष्टानां च कार्यकलापानाम् अभिनयं कृत्वा सज्जनानाम् अभ्युदयं दुष्टानां च पतनं दर्शयित्वा नाटके सामाजिकानां चेतसि सज्जनवदाचरणाय अभिरुचिः समुत्पाद्यते।

नाटकं (नाट्यम्) प्राचीनकालादेव सर्वेषां सहृदयानां चित्तप्रसादनम् अस्ति। देवाः अपि नाट्यावलोकने परमां मुदम् अनुभवन्ति स्म। भिन्नरुचयोऽपि जनाः नाट्यं समानभावेन अभिनन्दितवन्तः यथोक्तं कविकुलगुरुणा महाकविना कालिदासेन मालविकाग्निमित्रे—

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥

इदानीन्तमं चलचित्रमपि नाट्यस्यैव अङ्गम् अस्ति । बहुविधनाट्यस्य मध्ये नाटकमेव सर्वाङ्गपूर्णं वर्तते । अत एव 'काव्येषु नाटकं रम्यम्' इति कथनम् अतिशयसमीचीनं विद्यते ।

--: ० :--

भारवेरर्थगौरवम्

संस्कृतसाहित्ये सुप्रसिद्धानां महाकवीनां मध्ये कतमः कविः कतमां विशेषतां बिभर्ति—इति जिज्ञासायां इदं कथनम् उद्ध्रियते—

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥
उदिते नैषधे काव्ये क्व माघः क्व च भारविः ।

उक्तकथने पञ्चानां महाकवीनां वैशिष्ट्यं निर्धारितम् । वस्तुतः उपमाविधानम्, अर्थगौरवम्, पदलालित्यं च सर्वेषां महाकवीनां रचनासु समुपलभ्यते । "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायेन यस्मिन् या प्रधानता भवति स तदर्थं विशेषेण विख्यातो जायते । महाकविभारवेः किरातार्जुनीये महाकाव्ये यद्यपि उपमाविधानं, पदलालित्यं चापि हृद्यं विलसतः तथापि भारवेः कृतौ अर्थगौरवस्य प्राधान्यं वर्तते । अतएवायं महाकविः अर्थगौरवाय प्रसिद्धः ।

भारवेः रचनायाम् अर्थगौरवं प्रति पक्षपातस्य प्रथमः सङ्केतः वनेचरस्य युधिष्ठिरं प्रति दुर्योधनगतस्य वृत्तान्तस्य निवेदने प्रस्फुटितः—

स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥

औदार्यविशेषशालिन्याः वाचः तात्पर्यम् अर्थगौरवमेव वर्तते ।

किरातार्जुनीये द्वितीयसर्गे भीमोद्गारस्य प्रशंसायां युधिष्ठिर-कथनमेव भारविमुखेन अर्थगौरवस्य स्वीकृतिरस्ति । तदेवम्—

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥

वस्तुतः पदानां स्फुटतायाम्, पुनरुक्तदोष-राहित्ये, साकांक्षतायां तु प्रायः सर्वेषां महाकवीनां शक्तिरस्ति, परन्तु यः सुस्फुटं काव्येऽर्थगौरवस्य महिमानं स्वीचकार स खलु भारविरेव । सम्भवतः भारवेः इमां विशेषता-मेव पुरस्कृत्य "भारवेरर्थगौरवम्" इति कथनं प्रसिद्धि प्राप । अल्पैः शब्दैः गुर्वर्थस्य अभिव्यक्तिः एव अर्थगौरवम् उच्यते । किरातार्जुनीयस्य निम्नलिखितं पद्यम् अर्थगौरवस्य भव्यम् उदाहरणमस्ति—

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद् व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः ॥

अस्मिन् पद्ये पदानि अनेकार्थकानि सन्ति यैरर्थगौरवं वितन्यते । पदानामेकोऽर्थो दुर्योधनपक्षगो वर्तते । द्वितीयश्चार्थः उरगपक्षीयोऽस्ति । एवं हि श्लेषानुप्राणितया उपमया पद्येऽस्मिन् सुन्दरम् अर्थगौरवस्या-योजनं विहितम् ।

किरातार्जुनीयस्य द्वितीयसर्गे भीमभाषणे अनेकानि पद्यानि अर्थ-गौरवस्य मनोरमां शोभां प्रथयन्ति । तेषु द्वित्राणि विलोक्यन्ताम्—

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥

अस्मिन् पद्ये तान्येव पदानि नयपक्षे जलाशयपक्षे चार्थम् उपस्थापयन्ति ।

प्रभवः खलु कोशदण्डयोःकृतपञ्चाङ्गविनिर्णयो नयः ।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥

एतस्मिन् पद्ये कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकाल-विभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गानि । तेषां विनिर्णयो नयः, मन्त्रशक्तिरिति यावत् । कोशदण्डयोरित्यस्य अर्थराशिः—

चतुरङ्गसैन्ययोः प्रभवः=जनकः इत्यर्थः। प्रभुशक्तिरित्यर्थः। स नयः विधेयपदेषु=कार्यवस्तुषु- दक्षतां=क्षिप्रकारित्वम् अपेक्षते उत्साहशक्ति-रित्यभिप्रायः। प्रभुशक्ति-जनयित्री मन्त्रशक्तिः उत्साहशक्तिं विना पङ्गु-वद् वर्तते। अत एवेदानीम् उत्साहः एव आश्रयणीयः इति भीमस्य तात्पर्यम्। इदम् अर्थगौरवमण्डितं पद्यं "भारवेरर्थगौरवम्" इति कथनं विशेषेण विशिनष्टि। एवं होदं सिद्धयति यद् भारविः स्वकीये महाकाव्ये रसगुणालङ्काराणां प्रयोगं कुर्वन्नपि अर्थगौरवं प्रति समधिकां रुचिं प्रादर्शयत्। भारवेः अर्थगौरवं प्रति विशेषाम् आसक्तिं दृष्ट्वा "भारवे-रर्थगौरवम्" इति कथनं तात्त्विकं प्रतिभाति।

—:०:—

बाणोच्छिष्टं जगत्सर्वम्

संस्कृतसाहित्ये महाकवि-बाणभट्टस्य महत्त्वपूर्णं स्थानमस्ति। बाण-भट्टस्य याः प्रसिद्धाः कृतयः सन्ति तासु हर्षचरितम् आख्यायिका कादम्बरी च कथा स्तः।चण्डीशतकं शतपद्यात्मकं स्तोत्रम् अस्ति।

'गद्यं कवीनां निकषं वदन्ति' इत्यनुसारेण कविप्रतिभायाः परीक्षा सम्यक्प्रकारेण गद्यकाव्ये एव भवति। पद्यकाव्ये तु छन्दोविधानात् पादवर्ण-मात्रा-प्रतिबन्धवशात् शेमुषीविकासाय तादृशोऽवसरो नोपलभ्यते।

बाणभट्टस्य रचनानाम् अवलोकनेन तस्य अत्युत्कृष्टायाः प्रतिभाया बोधो भवति। बाणे भाषायाः भावानां वा दारिद्र्यं नास्ति। स हि भव्यभाषया भावानां प्रकाशने सिद्धहस्तः। भावानां प्रकाशनाय उपयुक्ताः शब्दाः स्वयमेव तस्य पुरतः उपस्थिताः भवन्ति। बाणस्य कीर्तिकौमुदी-प्रथनाय कादम्बरीहर्षचरितयोर्मध्ये कोऽप्येको ग्रन्थः अलम् अस्ति।

महाकविबाणस्य रचनासु पाञ्चालीरीतेः प्राचुर्यम् अस्ति। बहुषु स्थलेषु गौडीरीतेरपि प्रयोगो दृश्यते। महाकविः अलङ्काराणां प्रयोगे

अतिनिपुणः। उपमानाम् उत्प्रेक्षाणां तु सहस्रशः भव्याः प्रयोगास्तेन कृताः। श्लेषानुप्राणितस्य परिसंख्यालङ्कारस्य प्रयोगे बाणोऽप्रतिमः। राज्ञः शूद्रकस्य वर्णने परिसंख्यालङ्कारस्य भव्यः प्रयोगोऽवलोक्यताम्—

'यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसङ्कराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः, शास्त्रेषु चिन्ताः………… सार्यक्षेषु शून्यगृहाः, न प्रजानामासन् ।'

बाणोऽवसरानुकूलं सरलं विरलसमासं समासबहुलं वा गद्यं प्रयुङ्क्ते। हर्षचरिते यदा दुर्वासाः सरस्वत्यै शापं ददौ तदा ब्रह्मा दुर्वाससम् अतिसरलया शब्दावल्या उपालभते—

'ब्रह्मन् न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। निहन्त्येष परस्तात्।………आलोकमपहाय कथं तमसि निमज्जसि। क्षमा हि मूलं तपसाम् ।'

कादम्बर्यां शुकनाशोपदेशे पुण्डरीककपिञ्जल-महाश्वेतावृत्तान्ते च अतीव सरलं गद्यं प्रयुक्तम्। शुकनासोपदेशे यथा—

'न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयति। न कुलक्रममनुवर्तते। न शीलं रक्षति। न वैदग्ध्यं गणयति।'

यदा महाश्वेता-कपोल-संस्पर्शानन्तरम् पुण्डरीकस्य धैर्यं स्खलति तदा तस्य मित्रस्य कपिञ्जलस्य प्रणयकोपस्य गद्यमपि बहु सरलं वर्तते—

सखे पुण्डरीक ! नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः।….

समासबहुले ओजोगुणसमायुक्ते गद्यप्रयोगेऽपि बाणोऽद्वितीयः। हर्षचरिते प्रदोषवर्णने यथा—

'सङ्कोचोदञ्चदुच्चकेसरकोटिसङ्कटकुशेशयकोशकोटरकुटीरशायिनि षट्चरणचक्रे नृत्तोद्धतधूर्जटिजटाटवीकुटजकुड्मलनिकरनिभे।'

बाणस्य रचनानाम् अध्येतृजनः तेषु तेषु रस-भावेषु निमग्नः ब्रह्मानन्दसहोदरं रसनिचयं स्वदते। बाणः खलु रससिद्धः कवीश्वरः। तदेव विभाव्य सहृदयशिरोमणयः विद्वांसः बाणं नानाप्रशस्तिभिः भूषया-

मासुः। काव्यरसमर्मज्ञो धर्मदासः बाणस्य वाणीं रसभाववतीं समर्थयन् समुदीरयति—

रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।
सा किं तरुणी ? न हि न हि वाणी बाणस्य मधुरशीलस्य ॥

बाणस्य कृतिषु कलापक्षस्य भावपक्षस्य च समासरूपेण स्थितिं दृष्ट्वा तं संस्कृतसाहित्ये श्रेष्ठतमानां महाकवीनां मध्ये गणयन्ति विद्वांसः। गद्यसाहित्ये तु तस्य स्थानं सर्वोत्कृष्टम् अस्त्येव। गोवर्धनाचार्यः बाणं वाण्याः अवतारम् भावयति। यथा—

जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति ॥

नलचम्पूकारः त्रिविक्रमोऽपि बाणवाणीवैभवं प्रथयाञ्चकार। यथा—

शश्वद् बाणद्वितीयेन नमदाकारधारिणा।
धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः ॥

बाणप्रशस्तिप्रसङ्गे चन्द्रकवेः उक्तिरपि सारगर्भितास्ति यत्र बाणः सिंह इव चित्रितः तदितरे महाकवयः गजसन्निभा समुदीरिताः। यथा—

श्लेषे केचन शब्दगुम्फविषये केचिद्रसे चापरेऽ-
लङ्कारे कतिचित्सदर्थविषये चान्ये कथावर्णने।
आसर्वत्रगभीरधीरकविता-विन्ध्याटवीचातुरी-
सञ्चारी कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः ॥

महाकवि जयदेवो बाणभट्टं कविताकामिन्याः कामदेवं ब्रवीति स्म—'पञ्चबाणस्तु बाणः' इति। महाकविः सोड्ढलः बाणं सर्वोत्कृष्टं समर्थयति। यथा—

'बाणं तु सर्वेश्वरमानतोऽस्मि।'

एवमिदं सुस्पष्टं जायते यद् बाणकृतेषु वर्णनेषु रस-गुण-भावालङ्काराणां तादृशं प्राचुर्यं दृष्ट्वा तत्परवर्तिनां कवीनां कृते सर्वम् उच्छिष्टमेव अवशिष्यते। अत एव 'बाणोच्छिष्टं जगत्सर्वम्' इति कथनम् भूतार्थमेव।

—:०:—

माघे सन्ति त्रयो गुणाः

"उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणा ॥"

इदम् आभाणकं कस्यचिद् माघभक्तस्य उद्‌गारः इति केचित् कथयन्ति परन्तु माघमहाकाव्यस्य शिशुपालवधस्य परीक्षणेन इदं कथनं तात्त्विकं प्रतिभाति ।

उपमा

यद्यपि यादृशी सरला पदावली कालिदासीयासु उपमासु विलसति तादृशी माघीयासु उपमासु नास्ति, किन्तु मञ्जुलायां पदावल्यां प्रयुक्ताः माघोपमाः कस्य मनो न मोहयन्ति । गगनमण्डलाद् अवतरतो नारदस्य पर्वतराजेन हिमालयेन उपमा द्रष्टव्या—

दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम् ।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रव्रततीततीरिव ॥

धृतपीतवस्त्रस्य श्रीकृष्णस्य वाडवाग्नि-शिखाभिः आश्लिष्टेन समुद्रेण साकम् सादृश्यमपि प्रकामम् अभिरामं वर्तते—

स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः ।
विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां पतिः ॥

महाराजस्य युधिष्ठिरस्य युद्धे श्रीकृष्ण-महिमानम् असहमानः शिशुपालो यदा श्रीकृष्णम् अधिक्षिपन् युद्धोद्यतो बभूव, तदानीं शिशुपालेन सह सङ्ग्रामगतस्य श्रीकृष्णस्योरसि शोभमानः कौस्तुभमणिः स्वकिरणैः बलेभ्यः शोभां व्यतरत् यथा कोऽपि महात्मा प्रणतेभ्यो भक्तेभ्यो ज्ञानराशिं वितरति । यथा—

महतः प्रणतेष्विव प्रसादः स मणेरंशुचयः ककुम्मुखेषु ।
व्यकसद्विकसद्विलोचनेभ्यो ददालोकमनाविलं बलेभ्यः ॥

एवं हि माघकाव्ये शतशः पद्यानि सन्ति येषु उपमालङ्कारः चकास्ति ।

अर्थगौरवम्

अर्थगौरवाय महाकविः भारविः परां प्रसिद्धिं प्राप । परन्तु महाकविः माघः स्वकीये महाकाव्ये तादृशीम् अर्थगौरवयोजनां विहितवान् यथा भारविः ततः पश्चात्कृतः । एतद् दृष्ट्वैव "तावद् भा भारवेर्भाति यावन्माघस्य नोदयः" इति कथनं प्रसिद्धिं प्राप्नोत् । माघकाव्ये अर्थगौरवस्य भव्यमुदाहरणमवलोक्यताम्—

षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम् ॥

अत्र सन्धि-विग्रह-यानासन-द्वैधीभाव-समाश्रयाख्याः षड्गुणाः । प्रभुमन्त्रोत्साहाः तिस्रः शक्तयः । प्रभुसिद्धिः, मन्त्रसिद्धिः, उत्साहसिद्धिश्च इति तिस्रः सिद्धयः । अत्र उदयाः इत्यनेन वृद्धि-क्षयोदयाः गृह्यन्ते । एवम्प्रकारेण इदं पद्यम् अतीव अर्थगौरवमण्डितम् अस्ति ।

उद्धवमुखेन नृपस्य लोकोत्तरतां प्रतिपादयन् माघः लोकोत्तरमर्थगौरवं प्रस्तुतवान् । यथा—

बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः ।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥

अत्र बुद्धिः एव शस्त्रम्, स्वाम्यादिप्रकृतयः एव अङ्गानि, घनसंवृतिः= मन्त्रगुप्तिः एव कञ्चुकः=कवचः चाराः एव ईक्षणे, दूता एव मुखं यस्य सः एतादृशः कोऽपि=अनिर्वचनीयः लोकोत्तरः पार्थिवो भवति । एवं हि शिशुपालवधे अर्थगौरवस्य प्रभूतानि उदाहरणानि विलसन्ति ।

पदलालित्यम्

संस्कृतसाहित्ये महाकविः दण्डी पदलालित्याय अतीव विख्यातोऽस्ति । परन्तु महाकविः माघः पदलालित्ये दण्डिनम् अतिशेते । पदलालित्येऽपि महाकविः माघोऽद्वितीयः । शिशुपालवधे पदलालित्यस्य प्रद्योतनानि शतशः पद्यानि सन्ति, तेषु द्वित्राणि प्रस्तूयन्ते—

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ॥

अस्मिन् पद्ये यमकालङ्कार-सुविराजितं पदलालित्यं कस्य चित्तं न समाकर्षति ।

मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

अत्र मकारवर्णस्य आवृत्तिः पदलालित्यं तनुते ।

पदलालित्यं तु समग्रे माघकाव्ये आद्यन्तं सुविराजते । एभिः उदाहरणैः इदं सुस्पष्टं जातं यद् "माघे सन्ति त्रयो गुणाः" इति कथनम् अतीव समीचीनं वर्तते ।

—:०:—

हितं मनोहारि च दुर्लभं वचः

इयं सूक्तिः महाकविभारविविरचितस्य किरातार्जुनीयमहाकाव्यस्य प्रथमे सर्गे वनेचरकथनभूमिकायां वर्तते । अस्यां सूक्तौ युधिष्ठिरनियुक्तो वनेचरो राज्ञो दुर्योधनस्य प्रजागतं राजगतं च व्यवहारं महाराजाय युधिष्ठिराय निवेदयितुकामः 'चरेण प्रियं वा अप्रियं वा सत्यमेव निवेदनीयम्' इति चरधर्मं परिपालयन् कथयति—हे महाराज ! तादृशं वचनं दुःखेन लभ्यं भवति यत् सत्यमपि भवेत् श्रवणमनोहरं च स्यात् ।

धर्मशास्त्रे यदुक्तं "सत्यं ब्रूयात् प्रियं ब्रूयात्……" इति तत् स्मृत्वैव इदं कथितम् । यथार्थे व्यवहारे मनोहरं हितकरं च वचनं क्वचिदेव महता सौभाग्येन लभ्यते । प्रायेण यानि वचांसि हितकराणि सन्ति, तानि मधुराणि न भवन्ति । यानि च मधुराणि भवन्ति तानि हितकराणि न सन्ति । इदमेव लक्ष्यीकृत्य महात्मना विदुरेण महाभारते राजा धृतराष्ट्रः सम्बोधितः—

सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥

अर्थात् तादृशाः जना सर्वत्रैव सुखेन समुपलभ्यन्ते ये मधुर-मधुराणि कर्णरम्याणि वचनानि श्रावयित्वा स्वकीयानि कार्याणि साधयन्ति, परन्तु ये हितगर्भम् अप्रियं वदन्ति श्रृण्वन्ति च तादृशस्य कर्णकटुनः पथ्यस्य कथयितारः श्रवणकर्तारश्च दुर्लभाः एव।

भोजप्रबन्धेऽपि काशीवासिनो द्विजस्य सूनोः कर्णकटुकां हितान्वितां वचन-संतति श्रुत्वा गुणग्राही भोजः सम्यगुक्तवान्—

मनीषिणः सन्ति न ते हितैषिणः
हितैषिणः सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणां
यथौषधं स्वादु हितं च दुर्लभम्॥

प्रायो राजानः प्रभावशालिनो वा जनाः प्रयोजनसाधकैः मधुरभाषकैः जनैः परिगताः भवन्ति। तेषु सर्वे हितकारिणा न भवन्ति। हितैषिणः खलु हितमेव वदन्ति, भवतु नाम कटु तत्।

यदा च प्रशासकः प्रभावशाली वा जनः चाटूक्तीः श्रावं श्रावं चाटुकारैः प्रतिपादितेन महत्त्वेन गर्वितो भवति तदा स पतनं प्राप्नोति। राज्ञः, प्रशासकस्य, प्रभावशालिनो वा जनस्य संविधे यथार्थवादिनां निर्भीकानां जनानां महती आवश्यकता विद्यते।

दुर्योधनोऽपि कर्णशकुनि-दुःशासन-प्रभृतिभिः पाण्डवान् प्रति ईर्ष्या-ज्वालादग्धैः जनैः परिगतः, मधुरभाषिणो जनान् अभिनन्दन् हितभाषिणो विदुरप्रभृतीन् तिरस्कुर्वन् महाभारतस्य युद्धस्य अपकीर्ति गतवान्।

एवमेव अन्येऽपि भूपतयः तदितरं च जनाः मनोहरवचनश्रवण-परायणाः भूत्वा हितवचनं विरुध्य पापीयसीं गतिं प्राप्तवन्तः। अत एव वनेचरेण समीचीनमेवोक्तम्—

हितं मनोहारि च दुर्लभं वचः। इति।

—:o:—

अस्माकं देशः

(भारतमहिमा, भारतगौरवं वा)

अस्माकं देशस्य नामधेयं भारतवर्षम् इत्यस्ति। भारतनामकस्य विश्वविश्रुतस्य चक्रवर्तिनो नृपस्य अधिष्ठानत्वादयं देशो भारतवर्षम् इत्युच्यते। विष्णुपुराणे भारतवर्षस्य स्थितिविषयकं प्रमाणमुपलभ्यते यदनुसारं हिमालयस्य दक्षिणतः समुद्रस्योत्तरतो यद् वर्षं विलसति तद् भारतवर्षं नाम। स्वर्गं जिगमिषूणां मुमुक्षूणां च कृते भारतवर्षं कर्मभूमित्वेन वर्तते। यथा—

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
तद् वर्षं भारतं नाम भारती यत्र संततिः॥
कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम्।

देवा अपि भारतभूमेर्महिमानं गायन्ति। यथा—

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषा सुरत्वात्॥

श्रीमद्भागवतपुराणेऽपि भारतवर्षस्य महिमा गीतः—

अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।
यज्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवोपयिकं स्पृहा हि नः॥

अस्माकं देशस्य प्राकृतिकसम्पत् कस्य मनो न मोहयति? उत्तुङ्गा हिमावृता हिमालयस्य श्रेणयः, विन्ध्यपर्वतस्य सुविस्तृताः पर्वतशृङ्खलाः, वनराजयः, उपवनानि, गङ्गा-यमुना-सरयू-रेवा-चर्मण्वती-तापी-गोदावरीप्रभृतयो नद्यः, ब्रह्मपुत्रशोणादयो नदाः, निर्झराः, शस्यश्यामला भूश्च सर्वस्य चित्तं हर्षनिर्भरं कुर्वन्ति।

अस्माकं देशस्य भारतवर्षस्य पूर्व-दक्षिण-पश्चिमभागेषु उत्तुङ्ग-तरल-तरङ्गमालाधारिणः पयोनिधयः सुशोभन्ते। समग्रे भारते महान-

गराणि लघुनगराणि मध्यमकोटिकनगराणि च सुविराजन्ते। शस्य-श्यामलैः केदारखण्डैः परिवृत्ता ग्रामाः सुविराजन्ते।

अस्माकं देशः प्राचीनकाल एव भूयसीमुन्नतिं कृतवान्। यदा जगति अद्यतनाः सभ्यम्मन्यमानाः जातयः पशुप्रायं जीवनं जीवन्ति स्म तदानीमेव अस्माकं पूर्वजाः आर्याः वेदज्ञानं साक्षात् कृतवन्तः।

अस्माकं देशस्य महती सांस्कृतिकपरम्परा वर्तते। आध्यात्मिक-दृष्ट्याऽस्माकं देशो निखिलस्य संसारस्य प्रथमो गुरुः। अत एव मनुस्मृतौ मनुरुदघोषयत्—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

अर्थात् पृथ्वीगताः सर्वे मानवाः भारतवर्षोत्पन्नात् आचारनिष्ठाद् ब्राह्मणात् स्वस्याचरणस्य शिक्षां गृह्णीयुः।

अस्माकं देशस्य गौरवमयमतीतमस्ति। भारतवर्षम् अत्रि-वशिष्ठ-विश्वामित्रागस्त्यप्रभृतयः ऋषयो वेदानां घोषेण त्यागतपोमयेन च स्वकीयेनाचरणेन परमं पावनं कृतवन्तः। रामकृष्णादयोऽवतारपुरुषाः स्वैराचरणीयैश्चरित्रैः भारतभुवः सर्वान् भागान् प्रभावितवन्तः। दुर्गा-काली-गायत्री-सीता-राधा-सावित्रीप्रभृतयो देव्यः स्वीयैश्चरित्रैः पाति-व्रत्येन च भारतदेशं कृतार्थं चक्रुः। नल-मान्धाता-युधिष्ठिरादयः प्रजा-वत्सला राजानो भारतदेशस्येतिहासं पवित्रं कृतवन्तः। अस्य धुरन्धराः वीराः स्वर्गं गत्वा तत्र देवराजस्य युद्धेषु साहाय्यं कृतवन्तः। पुरा खल्वयं देशः स्वसमृद्धिवशात् 'स्वर्णविहङ्गम' इत्याख्यया विख्यातो बभूव।

बहुषु विघ्नेषु सत्स्वपि अस्माकं देशः परमामुन्नतिं कृतवान्। परा-धीनताकालेऽस्माकं देशे विविधवस्तुनिर्माणम् न तथा भवति स्म, यथा अधुना। इदानीन्त्वस्मिन् देशे वायुयानान्यपि निर्मीयन्ते, का पुनः कथा रेलयान-बसयाननिर्माणानाम्।

सम्प्रति भारतदेशः परमाणुशक्तिसम्पन्नानां देशानां मध्ये वर्तते।

अस्य स्थलसेना विश्वस्य सर्वोत्कृष्टा सेनास्ति । वायुसेना जलसेना चापि परमोत्कृष्टे वर्तेते ।

विश्वे जनसंख्यादृष्टया चीनदेशः प्रथमं स्थानं भारतवर्षं च द्वितीयं स्थानम् अलंकुरुतः । क्षेत्रफलदृष्टयास्माकं देशश्चतुर्थे क्रमेऽस्ति । भारत-वसुन्धरायां बहूनि वसूनि पृथ्वीगर्ते समाविष्टानि सन्ति, यानि वैज्ञानिकैः यन्त्रैः अन्विष्यन्ते । आशास्महे वयं यदस्माकं देशः शीघ्रमेव विश्वस्य प्रमुखतमो देशो भविष्यति ।

—:०:—

मदीयं प्रियपुस्तकम्

(गीता सुगीता कर्त्तव्या)

श्रीमद्भगवद्गीता मदीयं प्रियं पुस्तकम् अस्ति । महाभारते यदा कौरव-पाण्डवयोः सेने सम्मुखीने आस्ताम्, उभयोः सेनयोः मध्येऽर्जुनः स्वकीयान् सम्बन्धिनो दृष्ट्वा, युद्धे तेषां वधो भविष्यतीति चिन्तयित्वा दयामापन्नो विविधवितर्क-समाकुलः युद्धनिश्चयाद् विच्युतः रथोपरि निषण्णः श्रीकृष्णं कर्तव्यं पृष्टवान् तदा श्रीकृष्णोऽर्जुनाय यम् उपदेशम् प्रदत्तवान् स एव श्रीमद्भगवद्गीतानाम्ना प्रसिद्धिं प्राप्तवान् ।

श्रीमद्भगवद्गीता सर्वासाम् उपनिषदां सारोऽस्ति । भगवान् श्रीकृष्णः उपनिषद्रूपाणां गवां दोहनं कृत्वा सर्वेषां जनानां कृते गीतामृतरूपं दुग्धं सुलभं कृतवान् । उपनिषद्-गोदोहने मध्यमपाण्डवः अर्जुनः वत्सः परिकल्पितः । यथोक्तम्—

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

"कार्यं कर्म समाचर" इत्यनुसारं करणीयानां कार्याणां सम्पादनमेव

कर्मयोगान्तर्गतं वर्तते। कर्मयोगस्य केन्द्रविन्दुः निम्नलिखितः श्लोकोऽस्ति—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

गीतायां भगवतः श्रीकृष्णस्य ज्ञानविषयकः समुद्गारोऽपि समवलोकनीयः—

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥

कर्मयोग-ज्ञानयोगयोः समन्वयोऽपि श्रीकृष्णेन समनुष्ठितः। यथा हि ज्ञानयोगसंस्थिताः जनाः यत् स्थानं प्राप्नुवन्ति तदेव स्थानं कर्मयोगनिरताः जनाः अपि संलभन्ते। अत एव यो जनः कर्मयोगे ज्ञानयोगे च समानताम् पश्यति स एव वास्तविकताम् अवगच्छति—

यत्सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति॥

कर्मयोगे च यः चित्तं स्थिरीकर्तुं न शक्नोति स भक्तियोगेन आत्मनः कल्याणं सम्पादयितुं शक्नोति। भगवान् श्रीकृष्णः एकादशे अध्याये अर्जुनाय स्वकीयं विश्वरूपं प्रदर्श्य, अन्ते तम् अब्रवीत्—मदीयम् इदं स्वरूपं वेदानाम् अध्ययनेन, तपसा, ज्ञानेन, यज्ञकरणेन वा द्रष्टुं न शक्यते। इदं विश्वरूपं तु अनन्यया भक्त्या एव विलोकयितुं शक्यते। यथा—

नाहं वेदैर्न तपसा न ज्ञानेन न चेज्यया।
शक्यमेवं विधो द्रष्टुं दृष्टवानसि मां यथा॥

कर्मयोगस्य ज्ञानयोगस्य भक्तियोगस्य चैते मार्गाः जनस्य श्रेयः प्रेयश्च संविधातुं शक्नुवन्ति। एतेषु त्रिषु मार्गेषु एकस्यापि अवलम्बनकर्ता आत्मकल्याणं कर्तुं पारयति किमुत त्रयाणाम्।

श्रीमद्भगवद्गीतायाम् अष्टादश अध्यायाः सुशोभन्ते येषु सप्तशतानि पद्यानि विलसन्ति। जगद्गुरुशङ्कराचार्यप्रभृतयः महात्मानः गीतायाः

लोकोत्तरं महिमानम् अवलोक्य तस्याः भाष्यं लिखितवन्तः। तिलकादयो गीतारहस्यं विविच्य गीतायाः सिद्धान्तानां मनन कृत्वा तदनुसारं च आचरणं विधाय महापुरुषतां जग्मुः।

न केवलं भारतीयाः विद्वांसः गीतायाः लोकोत्तरं महिमानं स्वीकुर्वन्ति, अपि तु मैक्समूलरप्रभृतयः पाश्चात्त्याः विद्वांसोऽपि गीतायाः महत्त्वं स्वीकुर्वन्ति। जगतः प्रायः सर्वासु भाषासु गीतायाः अनुवादः उपलभ्यते। अत एव सर्वसंशयच्छेदिनी श्रीकृष्णमुखकमलसमुद्भूता गीता मह्यम् अत्यधिक रोचते।

अधस्तने पद्ये तथ्यमेव उक्तं केनचित् :—

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता॥

—:o:—

हिमालयः

हिमालयः अस्माकं देशस्य उत्तरस्यां दिशि विद्यते। अयं भारतस्य समग्राम् उत्तरदिक्सीमां व्याप्य तिष्ठति। काश्मीरप्रदेशमारभ्य अरुणाचलप्रदेशं यावत् अस्य स्थितिः वर्तते। अयं जगतः सर्वोत्तुङ्गः पर्वतः। अतएव अयं पर्वतराजः अभिधीयते। गौरीशङ्करशिखरम् (एवरेस्ट) अस्य उत्तुङ्गतमं शृङ्गं वर्तते। कुमारसम्भवे महाकाव्ये महाकविः कालिदासः हिमालयस्य विशदं वर्णनं कृतवान्। तत्र आदिमं पद्यं यथा —

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥

अयं न केवलं प्रस्तरराशिः, अपि तु सजीवः वर्तते। जगदम्बा पार्वती अस्यैव तनयात्वं प्राप्य इमं समधिकं महिमान्वितं चकार। मैनाको नाम पर्वतः अस्यैव पुत्रः आसीद् यः इन्द्रकृतपक्षच्छेदभयात्

समुद्रे स्वकीयं निवासं स्थिरीचकार। भगवान् शङ्करो हिमालयस्यैव एकभागे कैलासे सपरिवारः सगणश्च तिष्ठति। अनेके महर्षयोऽत्रैव तपस्तप्त्वा परां सिद्धि प्रापुः।

महर्षिः व्यासः अस्यैव बदरिकाश्रमे आश्रमम् उपकल्प्य निवासं चकार। अत्रैव वेदानां वर्गीकरणं सम्पादितवान्। अत्रैव स भारतीय-संस्कृतेः अनुत्तमं ग्रन्थं महाभारतं प्रणिनाय। इहैव स वेदार्थानां व्यासाय रहस्यावगतये च पुराणानां प्रथनं कृतवान्।

हिमालयाद् गङ्गा-यमुनाप्रभृतयो नद्यो निर्गत्य स्वकीयेन अमृतजलेन भारतभुवम् अलङ्कुर्वन्ति यासां तटेषु स्थितानि महानगराणि नदोनां सलिलम् उपयुज्य महान्तं विकासं चक्रुः। यासु च विशालानां बन्धानां विनिर्माणं कृत्वा ततः कुल्याः निःसार्य क्षेत्राणां सेचनव्यवस्था विधीयते विविधानि अन्नानि शाकानि फलानि चोत्पाद्यन्ते। हिमालया-न्निर्गतानां नदीनां महिम्नो मूले हिमालयस्यापि महिमा तिष्ठति।

भारतस्य उत्तरस्यां दिशि हिमालयस्य अवस्थानाद् देशस्य उत्तरे भागे यथेष्टा वृष्टिः सम्भवति। यतो हि मानसूननामानो वायवः हिमालयस्य उन्नतानि शिखराणि स्पृष्ट्वा परावृत्य भारतभुवि वर्षां कुर्वन्ति। यदि हिमालयो न अभविष्यत् तर्हि भारतस्य शस्यश्यामलः उत्तरो भागो मरुभूमिः अभविष्यत्।

हिमालये बहवः खनिजाः पदार्थाः प्राप्यन्ते। अत्र विद्यमानेषु वनेषु अनुत्तमा काष्ठसम्पत्तिः प्रचुरमात्रायां विद्यमाना अस्ति।

हिमालयस्य निसर्गसुन्दराणि दृश्यानि पर्यटकानां मनांसि मोहयन्ति। हिमालयस्य उपत्यकासु बहवः ग्रामाः नगराणि च वर्तन्ते। अत्र लघूनि लघूनि क्षेत्राणि निर्माय कृषिः क्रियते।

१९६२ तमाद् ईसवीयवर्षात् पूर्वं हिमालयः भारतस्य प्रहरी इव आसीत्, परन्तु इदानीं विज्ञानस्य अत्युन्नतिवशात् अत्रापि सेनायाः गमनागमने सम्भवेऽभूताम्। १९६२ तमे ईसवीयाब्दे चीनदेशो हिमालय-

स्थिते भारतस्य भूभागे आक्रमणं कृतवान्। ततः प्रभृति हिमालये महती भारतीया सेना देशरक्षार्थं तिष्ठति।

हिमालयोऽस्माकं देशस्य शिरोभागो वर्तते। यथा शरीरे शिरसः सर्वाधिकं महत्त्वं विद्यते तथैव अस्माकं देशे हिमालयस्य महत्त्वमस्ति। यथा शिरसः सुरक्षणम् अत्यावश्यकम् भवति तथैव भारतभुवः शीर्ष-स्थानीयस्य हिमालयस्य सुरक्षणमपि अत्यावश्यकम् अस्ति।

—:०:—

अयोध्या

अयोध्यायाः समुल्लेखो वेदवाङ्मयेऽपि वर्तते, किन्तु वाल्मीकीय-रामायणे अस्याः साङ्गोपाङ्गं वर्णनमुपलभ्यते। अयोध्यानगर्याः स्थापनां वैवस्वतो मनुः कृतवान्। अस्याः स्थितिः कोसलजनपदे सरयूतीरेऽविद्यत इति वाल्मीकीयरामायणे निगदितम्—

कोसलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥
अयोध्या नाम नगरी तत्रासोल्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्॥

महाराजस्य दशरथस्य समये अयोध्या द्वादशयोजनम् आयता त्रीणियोजनं च विस्तीर्णा आसीत्। अधुनापि अस्याः सन्निवेशः सरयूतटे-ऽस्ति, किन्तु विस्तारः तादृशो नावलोक्यते। महाराजस्य दशरथस्य समये अयोध्या आदर्शनगरी आसीत।

वीरपुरुषाणां संग्राहको महाराजो दशरथः अयोध्याम् अन्वर्थकां कर्तुं वीरपुरुषाणां सहस्राणि तस्याम् आवासयामास। ते वीराः बाण-सञ्चालने शब्दवेधे च विशारदाः आसन्। ते हि खड्गमात्रसहायाः सिंहान्

घ्नन्ति स्म । एतादृशैः अग्निकल्पैः प्रशिक्षितैः योधैः अयोध्या नगरी सिंहैः अध्युषिता गुहेव प्रतिभाति स्म । यथोक्तं वाल्मीकीयरामायणे—

ये च बाणैर्न विध्यन्ति विविक्तमपरापरम् ।
शब्दवेध्यञ्च विततं लघुहस्ता विशारदाः ॥
योधानामग्निकल्पानां पेशलानाममर्षिणाम् ।
सम्पूर्णा कृतविद्यानां गुहा केसरिणामिव ॥

तदानीन्तनाः सर्वे अयोध्यानिवासिनः सच्चरित्राः सुविभूषिताः विद्वांसश्चासन् । कोऽपि क्षुद्रबुद्धिः तस्करबुद्धिर्वा नासीत् । सर्वे जनाः वर्णव्यवस्थानुसारम् परस्परं व्यवहरन्ति स्म । सर्वेषु पारस्परिकं सामञ्जस्यम् आसीत् । यथा—

क्षत्रं ब्रह्ममुखं चासीत् वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वकर्मनिरतास्त्रीन्वर्णानुपचारिणः ॥

अयोध्यायाः परिगणनं सप्तपुरीषु वर्तते—

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥

इदानीम् अयोध्यायाः महत्त्वं भगवतः श्रीरामचन्द्रस्य अवतारभूमित्वेन वर्तते । प्रतिवर्षं लक्षशः नराः नार्यः बालवृद्धाश्च अयोध्याम् आगच्छन्ति तथा च श्रीरामस्य ताः ताः लीलाभूमीः दृष्ट्वा आत्मानं कृतार्थयन्ति । प्रायः वर्षपर्यन्तम् अयोध्यायां दर्शनार्थिनां जनसम्मर्दः समवलोक्यते । श्रीरामस्य जन्मोत्सवे चैत्रमासस्य शुक्लपक्षस्य श्रीरामनवम्याम् अति विशालो मेलापको भवति । अस्मिन्नवसरे जनसम्मर्दोऽवलोकनीयो भवति ।

श्रावणमासे मन्दिरे मन्दिरे दृश्यावलयो विलोकनीयाः भवन्ति । अस्मिन्नपि समये देशस्य सर्वेभ्यः प्रान्तेभ्यो देशान्तरेभ्यश्च भक्तिभावयुक्ताः जनाः समागत्य आत्मानं पुनन्ति ।

अतः परं कार्तिकमासे अयोध्या-परिक्रमायाः महत् महत्त्वं वर्तते ।